[illegible]

श्री गणेशाय नमः॥

१२४२-६२-

विश्वेश्वराज्यपति॥

स्वस्ति श्री मल्लकल गुसंपन्ने षुश्र स्म ब्रा॰

षुश्र रु ता ब लकल्ट का॰ कोटि श॰ सा श्वांग नत य॰

त्रभव की यमपित की हेवि श ष श्च॥ प्रत्र म ज्ञागम

नं करं लिण प्रेनाप्र नत्य प्रज्ञ तां॰ श्रीलंका स [illegible]

गणेशाय नमः॥ ॥वक्त्राणि पंक्तिकुचयोः प्रतिबिंबितानि दृष्ट्वा दशाननसमागमनभ्रमेण। भूयोपि शैलपरिवृत्तिनयेन गाढमालिं
गितो गिरिजया गिरिशः पुनातु ॥१॥ अधीत्य जयदेवेन हरिमिश्रात्पितृव्यतः। तत्त्वचिंतामणेरित्थमालोकोयं प्रकाश्यते ॥२॥ प्रसंगात्कं गम
स्य समाप्तिहेतुतां स्थापयितुं भूमिकामारचयति। इहेति। इह लोके खलु वाक्यालंकारे। एकदा कृताऽविप्रतिपत्तिरतोऽथ मङ्गलकताः शक
निः कृता विचारांगसंशयबीजविप्रतिपत्त्यदर्शनात् स्फुटता च परिहृता। तत्त्वनिर्णिनीषुविचारतया अन्यहेतुकसंशयस्यापि साधार
तदुक्तमन्यत्र सार्वदेव कर इति। तत्र विचारे तत्र प्रथमोद्दिष्टत्वेन पुरःस्फूर्तिकतया प्रत्यक्षमेव प्रमाणमाशंक्य निषेधति। नान्वयेति। नान्वय
व्यतिरेकज्ञानसाचिव्याध्यक्षगम्यत्वार्थः। अन्वयश्च यथापि कारणताशरीरप्रविष्टव्याप्तेरन्वयव्याप्तितया न व्यतिरेकसहचारापेक्षा वा एकी
तथापि सति व्यतिरेके न नवहेतोः सत्त्वशंकया व्यभिचारशंकाग्रस्तत्वात् अन्वयोपि किंचित्कर इति तच्छंकानिवृत्त्यर्थं व्यतिरेकापेक्षास्ती
ति द्वयं प्रपातं वस्तुतो नान्वयगम्यान व्यतिरेकगम्येति साध्यद्वयं। न च हेतोर्द्वितीयमात्रीयतया प्रथमसाध्ये हेतुत्वात् नः। न हि वयं विना
पि मंगलमित्यादिना ग्राहकाभावमावक्ष्महे येनैकतरसाध्यमात्रविषयता हेतोः स्यात् किंतु यदा समाप्तिः तत्र वै मंगलमित्येवं रूपक

सिद्धघटितकारणत्वरूपग्राह्याभावग्रहे सचोभयसाध्यसाधारणएव विषयाभावेस्यहि प्रत्यक्षमात्रप्रतिबंधकत्वात् नचग्राह्यविरहनिश्चयोना
स्यैवतत्रान्तरमंगलसंशयात्तत्संशयश्चनविरोधीमानमात्रोच्छेदापत्तेरितिवाच्यं।यद्वीसामग्रीयत्रप्रतिबंधकाविशेषादर्शनेसतितदशाविशे
षेतस्या अपिप्रतिबंधकत्वात्प्रकृतेचान्वयव्यतिरेकव्यभिचाराभ्यांविशेषदर्शनाभावादितिभावः।अन्योन्याश्रयादितिसिद्धेजन्मांतरमं
गलेऽव्यभिचारेसतिहेतुताग्रहः कार्यकारणभावेचगृहीतेसमाप्त्यातदनुमानमित्यर्थः।नतुसमाप्तेः कार्यतयाहेतुत्वेनास्तपरिशेषाभंग
लानुमानंइत्यतआह वा केति। तदसमवहितसामग्र्यजन्यत्वात्मकपरिशेषासिद्धेरित्यर्थः।यद्वाकारणताविष्टव्याप्त्यनन्यथासिद्धौ द्वैधायप्र
मंगलेहेतुत्वमाह।नचान्यथासिद्धिमुपेचस्तुनेतदंतभावः।अन्यत्रक्लृप्तपूर्ववर्तिनएवेत्यादेरवश्यकल्पनीयपूर्ववर्तिनएवकार्यसंभवे तत्स
हकृतमित्यर्थः तथाचतन्नैवैतदंतर्भावादितिभावः।अनुमानमाशंक्यनिषेधतिनापीति।सफलेबलवदनिष्टाननुबंधीष्टसाधनं नविष्टसा
धनत्वावगाहित्वाविगीतपदवैयर्थ्यापत्तेरितिभावः।शिष्टपदंचात्रांनपरंभिः फलेचैत्यवंदनजलताडनादौवैधरागजप्रसंगयोरभावेनवै
निषिद्धतयाऽविगीतिव्यभिचारवारणायाश्रमश्चफलसाधनतांशेविवक्षितोऽतोनबलवदनिष्टाननुबंधित्वांशाश्रमश्चलकीपरदा

गमनादौव्यभिचारवारणायउपात्तमविगीतपदमनर्थकतामापद्यते।अर्थांतत्वंचसर्वैकवाक्यतयास्तुअहंतदर्थमेवप्राकृतदु
…ते।आचारश्चयद्यपिक्रियैवतथापिविषयत्वश्रुतेः…तिरत्रविवक्षितातद्विषयत्वंच…यद्यपिप्रयोगेपिगतंमिलितैकांतस्तथापि
सा…लेनतद्विषयत्वंहेतुर्नोगस्तकउद्देश्यतया…तिविषयइतितत्वं।यद्वातद्विषयक्रियात्वादितिहेतुः।…तस्तशिष्टाचारविषयत्वाद
विगीताचारविषयक्रियात्वादितिहेतुद्वयं।अविगीतत्वंचबलवदनिष्टाननुबंधित्वंतेनमधुविषसंपृक्तान्नभोजनादौनव्यभिचारः।त
द्रव्यपूर्ववत्क्रियात्वादेवनफले…तीयहेतावनैकांतः।क्रियापदस्यफलान्यपरत्वात्।नचाफलेव्यभिचारः।बलवदनिष्टाननुबंधि
त्वस्यफलगर्भतयातत्रापितत्सद्भावात्।आचारविषयस्यफलाजनकस्यबलवदनिष्टजनकत्वनियमात्।कर्मकर्मेतिन्यायात्तथाअ
तेपिअत्रतदभावात्।नविप्रइत्यादिनातत्रापिवेदनिषेधात्।व…तस्तशिष्टपदंवेदप्रामाण्याभ्युपगंतृपरंतदाचारत्वंतन्नियताचारत्वंतदन
भ्युपगमासंभावितआचारत्वरूपमितियावत्।तच्चद्रव्यपूर्ववत्।अतएवदर्शोपिदृष्टांतः।तथासतिरात्रिश्राद्धादावेवव्यभिचारइत्यविगीतपद गम
मिति।यद्वादृष्टाचेष्टात्वेननिःफलस्यापिविगीताचारविषयत्वात्अविगीताचारविषयत्वाशिष्टाचारविषयत्वादितिहेतुद्वयंशिष्टत्वंच २

ष्टांतत्वमित्युक्तं आचारविषयत्वं च स्वजनकचिकीर्षाविषयत्वमतो न गोगाद्यौ व्यभिचार इति यद्वा चेष्टसाधनताज्ञानबलवदनिष्टा
नुबंधित्वज्ञानाजन्यावश्यप्रवृत्तिहेतुरितिमतं तदा विगीताशिष्टाचारहेतुरिति संक्षुब्ध एव ग्रंथः समीचीन इति स्मर्त्तव्यं। अपेक्षितत्वेने
ति। प्रवृत्त्युत्तरपेक्षाविषयत्वेन प्रवर्त्तमानस्योपस्थितत्वादित्यर्थः ननु माभूदन्यान्नियतोपस्थितिकं स्वर्गस्तु सकलकामनाविषयत्वे
न नियतोपस्थितिकः फलं न वेदित्यत आह विश्वजिदिति। यथा विश्वजिता यजेतेत्यत्र रात्रिसत्रन्याये नार्थवादादनुपस्थितेपीष्टवि
शेषाविते इष्टसाधनात्वपपत्त्या विशेषतः फलोपस्थितिं विना प्रवर्त्तकत्वान्यथानुपपत्त्या च विशेष्यतश्च फले कल्पनीये ग्रामपश्वादीनां
गौणप्रयोजनतया स्वर्गापवर्गयोरेव तथात्वेन तयोरप्यपवर्गस्याभावरूपतया च लघुः स्वर्ग एव फलं कल्प्यते तद्वदिहापीत्यर्थः। गौर
व[illegible]। अधिकारिद्वयकल्पनागौरवात् नन्वनुपस्थितकल्पनागौरवात्। ग्रामपश्वादिसाधारणतया[illegible]पकृष्टं कानुव्यापनात्। वि
[illegible]जेऽद्भ स्वर्गफलकत्वेऽपि प्रधानतयाऽधिकारित्वेऽङ्गत्वे च अप्रधानाधिकारिकर्त्तव्यत्वेनाधिकारभेदः। ननूक्तं महार्णवे वत्सेश्वरेण
[illegible]यावप्यनीष्टपूर्वकालांगकमंगलानुमाने गौरवमतो लाघवादंगताबोधकवेदानुमानमेवेति। वस्तुतो मंगलस्य विश्वजित्त्वाभ्यु

द्वारेण समयनियमो न स्यात् इतरथा तं न पूर्वकालांगतयैव तदुपपत्तिः तस्याधिकारिविशेषणत्वापत्तेः। तथा च पूर्वकालनिश्चयः प्रवर्तक
ः न च पूर्वत्वस्य प्रागभावगर्भतया प्रागभावत्वप्र...स्य नाविनिमानाभावात् दुःसंभवः। अत एव दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते
त्यत्र नेष्टौ सोमपूर्वकालत्वविधिरपि तु लक्षितलक्षणया इष्ट्युत्तरत्वविधिर्वा प्रत्ययेन सोमे क्रियत इति प्राभाकरा अपि वदंति। अस्तु वारं ग
णीयावद्वारस्य चिकीर्षा कामनोऽधिकारिविशेषणं तथापि तस्य स्तु निश्चयतया तत्संभवे प्राधान्येन तत्समयोत्तरविधिरत्यधिकं गौर
वं न चांगत्वेपि तत्तुल्यं। प्रधानकाले नैवाकांक्षा शांतिः। किंतु क्रमाकांक्षामात्रं। सापि प्रतिबंधकध्वंसद्वारत्वेनांगत्वे ज्ञाते पूर्वकाल एव
प्रयोजनमत्वेनार्थक्रमन्यायादेव शांतेति न तद्बोधकविध्यंतरापेक्षेति सर्वं सुस्थं। परिशेषानुमानेन इतराफलकत्वे सति सफलक
त्वानुमाने नानवगौरवेण सफलत्वानुमितौ स्वर्गाविषयत्वेपि न स्वर्गफलकत्वाभावः सिद्धः तत्कुतो हेतुसिद्धिरिति वाच्यं स्वर्गे नमंग
लफलं समाप्त्यपेक्षया गुरुत्वादिति गौरवलिंगत्वे तात्पर्यात्। वस्तुतस्तु समाप्तिमात्रफलकत्वे लाघवमन्यफलकत्वे गौरवमिति ला राम
घवप्रतिसंधानेन प्रतिसंधानोपस्थितसमाप्तिमात्रफलकत्वमेव सफलत्वानुमितिविषय इति युक्तः परिशेषः। अत एव लाघवज्ञा ३

नंलघुविषयकज्ञानेसहकारीत्युच्यते।यथाचैतत्तथावक्ष्यते।व्यभिचारेणव्यतिरेकव्यभिचारेणतथाचबाधइत्यर्थः।यद्यप्यत्रव्यभिचार
निश्चयोनास्त्येवतत्संशयस्त्वविरोधीयत्तुतसंदिग्धेन्यायप्रवृत्तेरनुगुणएवान्यथावेदोपिदूषकःस्यात्।अयोग्यतासंबाधातद्व्यवच्छेदनुकूल
लमिहापितुल्यं।तथाप्येवंपरंपरापातमात्रभियाप्रकारांतरोपादानमतएवश्रुत्यनुमानाभ्यांइत्यग्रेतत्रापिसंमतिमाहेति।तथावि
धेति।अलौकिकाविगीतनिर्विघ्नसमाप्तिकामशिष्टाचारानुमितेत्यर्थः।अलौकिकंचलोकावगतवलवदनिष्टाननुबंधीष्टसाधनान्यत्वं
नत्वप्रमापितत्वांतर्भावःसविषान्नभोजनेऽनैकांत्यात्।नचागम्यागमनेएवमपिनव्यभिचारइतिवाच्यं।रात्रिसंध्याश्राद्धादौव्यभिचा
रवारकत्वात्।एवंचाविगीतपदमनर्थकंनभवति।लोकपदंचादृष्टार्थकवाक्यातिरिक्तमानपरंतेनचैत्यवंदनाद्यपियदिबौद्धाग
मप्रामाण्यनिबंधनप्रवृत्ति।तदाशिष्टपदेनयदिजलताडनसाधारणं।तदाऽलौकिकपदेनवार्यतेशिष्टपदंचपूर्ववत्निःफलकर्मणि
अनैकांतिकवारकं।यद्वाअलौकिकविषयत्वेक्रदेप्राग्वदिहापिहेतुद्वयमेवशिष्टपदस्याश्रौतपरत्वेअलौकिकत्वंवेदप्रामाण्याभ्यु
पगंतृपरत्वेऽविगीतत्वमितिविवक्षाभेदेनहेतुद्वयं।तदर्थश्चपूर्वोक्तएवेतिवस्तुगतिः।अतएववेदानुमापकहेतौशिष्टपदंवेदप्राम

ण्णभ्यापगल्पपरमिति प्रकाशः तादृश्यपदस्य रसाद्युक्तएवहेतुरतो वेदमूलकत्वानुमानं फलविशेषनिश्चयः परिशेषादिति वयं ब्रूमः।
केचित्तु यादृशा लौकिकाविगीतशिष्टाचारविषयो यत्तु तादृशकर्तव्यत्वेन वेदबोधितमिति सामान्यतो व्याप्त्यवधारणमित्यवश्यं शिष्ट
कर्तव्यतया वेदबोधितमिति साध्यमतो न व्यभिचार इत्याहुः। न चेतिकर्तव्यतासंशयेन विरोधी तन्निश्चयस्तत्र नास्त्येवेति भावः। न चेदा
नीमानुपूर्वीविशेषविशिष्टलिंगाभावात् तद्विशेषप्रत्ययाधीनत्वाच्च शाब्दप्रत्ययस्य कथं वेदाधीनप्रत्ययात् तत् इति रितिवाच्यः। इदानीमं
धपरंपरामात्रशंकानिवर्तकत्वात्तदनुमानस्य। यदा स वेदः प्रत्यक्षः तदानुपूर्वीतान मासीत् एव इदानीं तच्छोषकाले नानुमानादिति दि
क्। नव्यापीति इदं त्वनुमानसौकर्यायोक्तं तदनुमानाभावेपि शब्देन तज्ज्ञानकर्ताबोधनेनाधिकाराभावात्। न च व्यभिचाराभावार्थं तत्र
शब्दादेव तज्ज्ञानाविति वोध्यं। ननु मंगलमंगे यदि तदा ऋषिकार्यैक्यलाघवं तदेव कुत इत्यत आह तत्त्वेति। आरब्धकर्मांगं। आरब्ध
कर्मसमानाधिकारिकं। कर्मार्थितया कर्मनिष्पत्त्यर्थितया कर्मफलार्थितया वा शिष्टैरन्यैः तेन निष्फलकर्मशाकाल क्रियमाणेन
व्यभिचारः। प्रधानस्यापि प्रधाननिष्पत्तीच्छया क्रियमाणस्यमिति तत्पूर्वमिति विशेषणं। तदर्थं च तत्कालान्यकाल इति। नष्टेन

राम
४

कर्मेपरामर्शात्। न च कर्मैकदेशे व्यभिचारः फलजनकतावच्छेदकावच्छिन्नस्य कर्मत्वात् न चैकदेशे तदिति भावः। फलांतराभावइति
फलांतरवद्वारंनणीयादौ अनैकांतिकतावारणाय फलांतराभावइति चैत्यवंदनादि नियतपूर्वं क्रियमाणे व्यभिचारवारणाय फल
वत्कर्मेति। तच्छिन्नफलवत्कर्मारंभेच्छया क्रियते चैत्यवंदनादीनामफलत्वात्। केनचित्तु फलकर्मारंभेच्छावता तत्पूर्वं क्रियमाणेऽ
नंगे व्यभिचारवारणाय नियमतइति। तच्चितदारंभेच्छावता नियमतो न क्रियते सर्वेणाकारणात्। प्रधानेव्यभिचारेवारणायत
त्पूर्वमिति। अत्र तच्छब्दः आरब्धकर्मपरः यदवच्छिन्नं कर्मआरब्धमिति यावत्। नन्विदमसिद्धं नमस्कारादीनामेव मंगलत्वात् तेषां
च बहुशः फलांतरश्रुतेरिति चेत् न फलांतराभावइति फलांतरप्रतिसंधानाभावइत्यर्थः। तथा च नियमतस्तत्पूर्वं करणे फलांत
रप्रतिसंधानेनयत्नहेतुरित्यर्थः पर्यवस्यति। अस्ति च नथाग्रेथाद्विपूर्वं क्रियमाणत्रणामादावारंनणीयादौ च तत्कालकरणे फलां
तरप्रतिसंधानं वीजंदर्शारंभकालत्वेन फलांतरश्रुतेः अत एव शिखावंधनमंगप्रधानं चेति सिद्धांतः। फलांतरप्रतिसंधानाप्रति
संधानाभ्यामुभयोपपत्तेः। यथाश्रुते त्वेकस्य फलांतरसत्वासत्वयोरसंभवेन कथमंगप्रधानभावो घटितइति सर्वं सुस्थं ॥ ॥

प्र.प बन्धकतो यथाश्रुत एव हेतुः मंगलीभूतनत्यादिव्यक्तीनां फलानंतराभावेनासिद्धत्वाभावादिति प्राचुक्तयुक्तौ ऽनुमानमप्यविकलमिति
श्रुत्यनुमानाभ्यामित्युक्तेः अयं च प्रतिसंधानाकारः इत्यवधेयं। तेनायमर्थः यदीदं फलानंतराभावे सति फलवत्कर्मीरिसमाने न नियम
तस्तत्पूर्वं क्रियमाणं तदाप्रधानसमानाधिकारिकं स्यात् एवं च लाघवमन्यथा गौरवमित्युक्तमेवानेन विवच्यत इति भावः। अतोना
न्वयः बोधनात्। प्रकृतलाघवसहकारेण बोधनसंभवात्। अत्र स्वरूपासिद्धिं शंकते ननु मंगलमिति। यत्तु मंगलं नाम अलौकिक
त्वादिति प्रतिरोधं अलौकिकत्वपदार्थमावच्छिन्नसाध्यव्यापकं लौकिकानंगत्वमुपाधिं वा शंकत इति। तन्न। विश्वजिन्न्यायात्स्वर्गः फल
मित्युत्तरग्रंथविरोधात्। नत्वसिद्धेन प्रतिरोधस्यात्यबलत्वाभावात्। नत्वासाधनव्यापकत्वोपाधिं साधनव्यापकता कथमुपाधेः साध
नस्य लौकिकांगभूतलौकिककर्मण्यपि सत्त्वादिति चेत्। न। अलौकिकत्वपदार्थमावच्छिन्नसाध्यव्यापकस्य तदवच्छिन्नसाधनव्यापक
त्वात्। यदवच्छिन्नसाध्यव्यापकः तदवच्छिन्नसाधनाव्यापकस्योपाधित्वात्। अन्यथा महानसत्वावच्छिन्नवह्निव्यापकस्य व्यंजनवत्त्वादे राम
रुपाधित्वापत्तेः। साध्यव्यापकनिवृत्त्या साध्यनिवृत्तिस्तया तद्व्याप्यसाधननिवृत्तिरिति एवं न किमप्यनुपपन्नं। नचैवं सार्थनावच्छे ५

वद्दोषत्वेऽपि हेत्वभावसाधनमनुचितं । दत्तोत्तरकल्पत्वात् । समाप्तिफलकताव्यवस्थापनस्यात्र प्रकृतत्वेन फलांतरविरहस्य मुख्यतः
प्रतिपाद्यत्वात् हेत्वभावं विना बाधासंभवाच्च । बाधप्रयोजकव्यापकाभाववत्साध्यसाधकहेतोरपि सत्वात् नन्वंगं सहकारि नेदं मंग-
लं च तथा तद्विना फलासिद्धेरित्यत आह लोकेति । तथाच तद्विना फलासिद्धिरसिद्धैवेत्यर्थः । इंकवाङ्कुरायसवायसः । आरंभसमय
निमित्तकं तत्समयनियतकर्त्तव्यताकं न तु नैमित्तिकमेव राहूपरागइतिवन्निमित्तसत्सम्पन्नतेरकरणे प्रत्यवायाश्रवणाच्च । तस्मि-
ति मंगलावच्छिन्नलौकिकांगत्वव्यापकमपूर्वे रूपोपकारजनकत्वमुपाधिरित्यर्थः । तथाच व्यापकताभावेन तदभावान्न साध्याभाव
इति भावः । अर्थं मंगलजन्य इत्यर्थः । उपाधेः साध्यव्यापकताग्राहकमनुकूलतर्कमाह तस्येति यस्य दृष्टस्य साक्षाज्जनकत्ववत् साक्षा-
त्प्रतिबंधकत्वमपि असंभावितं हि दृष्टसंपत्तावदृष्टप्रतिबंधकत्वं पश्यामः । तथापि नापूर्वजनकत्वं यथाश्रुतमेव किंतु अनपेक्षणीयजन-
कत्वं अपेक्षा च साक्षात्परंपरया चेति न कश्चिद्विशेषः । तथाच परंपराप्रतिबंधकस्यादृष्टस्याभावोऽपेक्षणीयो न वत्येवेति कथं तज्जन-
कमंगलेनोपाध्यभाव इति भावः । अहर्वे मिंडवाङ्कुवंधनजन्यं तथा लोकावगतसहकारिसाक्षात्परंपरया वाऽनपेक्षणीयत्वादित्यर्थः ।

वृदं

त्र·प ६ अन्यत्वमसहकारित्वं तद्विलंबेन फलाविलंबाद्व्यभिचारेयं न च मंगलेतरद्वितिपरमार्थः । नन्वपूर्वजनकत्वे मंगलस्यापेक्षणीयाजनकत्वस्तु पा
धरप्रत्यूहवृत्तिः स्यात्तदेव कुत इत्यत आह विघ्नेति । यद्वा प्रसंगाद्विघ्नं निरस्यतीति । यद्यपि सति विघ्ने अपूर्वद्वारा इदं मंगमिति तु वक्तुं तथापि त
दपूर्वं निवर्त्य आरब्धनिर्वाहकमनिवर्त्यैवानंत्येऽसंभवात् न हि सति प्रतिबंधके हेतुसहस्रमप्यलं ... कलोत्पादः हस्याविशिष्टानामोद्देश्येऽ
व्यः तदपेक्षया विशेषविरह एव लघीयान् । आद्येत निवर्तकत्वस्यावश्यकत्वे तदेव द्वारमावश्यकत्वात् न त्वंतरापूर्वं जनयित्वा तद्द्वारा वि
घ्नध्वंसो द्वारं गौरवादिति मनसि कृत्याह वस्तुत इति क्वचित्तत्र एव वेदादेव । पूर्वत्र कल्प्यो व्यापारः कल्पनीय इत्यत्र तु श्रौतद्वारानिवेदः । तदुक्तं व
र्त्तेश्वरेण वेदश्चात्र मीनमानो मंगलं श्रारिप्सितसाधनमित्याकारः प्रकारजिज्ञासायां परिशेषात्तत्प्रतिबंधकदुरितनाश एव ज्ञायते । यद्वा
तदेतज्जीवेनैव वेदात्रमानमिति । किं चेति । तथा चाधिकारिद्वयकल्पनाभियापि नापूर्वं द्वारमित्यर्थः । नन्वपूर्वद्वारकत्वं न तत्र तं त्वं अ
पि तु न पेक्षितजनकत्वमित्युक्तं तथा चापूर्वद्वारकत्वेपि मंगलस्य तज्जन्यापूर्वविलंबेन फलविलंबात् गतत्वं स्यादित्यत आह ज्ञातेति । न हि राम
लोवात्काये विलंबोऽसिद्ध एवेत्यर्थः । इदं द्वाक्यवेधनवदिति मधीस न्यायादिति । दुरितेति । यद्यपि इदं शौचाचमनादिलक्षणदुरितध्वंसे ६

पुंक्रियाप्रवृत्तौ व्यभिचारि। तथाविद्धविंतस्नानमात्रवदनधिकारिकतदर्थक्रियात्वादिति विवक्षितं शौचादौ तत्संशयेपि बोधनात् तत्स्नानमा
त्रमधिकारं रक्षतीत्येतन्मात्रादेव न व्यभिचार इति भावः। विघ्नसंशयेति तथा चात्रापि विशेषणासिद्धिरिति भावः। हिंसाद्यात्मकत्वहेतोरधिकारत
याऽधिकारत्वप्रतिबन्धकत्वं विरुद्धमित्यर्थः। अ... चेति। अनिष्टतावच्छेदकरूपावच्छिन्नसंशयेपि प्रवृत्तिर्दृश्यते तत्रोक्तन्याये बोधकत्वपरो
क्रमसंनिविद्धविंतध्वंसत्वेनोद्दिश्यत्वेन व्याप्तिविरहउपारब्धपानिवंधकाधेसत्वं तत्राहदृष्टतदन्यसाधारणमित्यर्थः। स्वर्गाभिलाष्ट्याधिकरणवि
रोधमाशंकते नमिति। यदि स्यप आक्षिपेत् तद्योपपत्त्यादिकमेव तत्कर्तुमावश्यकं निर्वपेदित्यादिना विहितं स्वर्गाभिलाष्ट्यादेर्दर्शपौर्णमास
प्रकृतित्वेन प्रकृतिवद्विकृतिरित्यतिदेशप्राप्तदर्शपौर्णमासधर्मग्रहे तदंगदेवतावाहनस्य पूर्वदिनेऽनुष्ठानमुक्तमित्यर्थः। यद्वेति।
व्रीहीनवहंतीत्यत्र व्रीहिपदस्य यवादिसाधारण्यार्थमजहत्स्वार्थलक्षणया नियोगसाधनीभूतद्रव्यमात्रपरत्वे कृष्णलेऽपि स्यादित्यत्र श्रुत्या
नियोगसाधनत्वेन बोधितकृष्णलस्यापि तत्प्राप्तौ वैतुष्यद्वारवाधेऽवघातवाधोपपत्त्यर्थः। कृष्णलः सुवर्णमाषः। न च कृष्णलेऽवघातवा
धे नहि कृतौ नीवारेपि तद्बाधापत्तिः। कृष्णलेऽवघातबाधेपि तत्प्रसंगाबाधात्। वस्तुतस्तु कृष्णलविकृतित्वेपि नीवारस्य नावघातबा

धेः। यद्धि न तावत्प्रकृतिवद्विकृतिरित्यतिदेशः सर्वधर्माणां। सर्वयागानां दर्शपूर्णमासात्मकतापत्तेः किंत्वत्रपदिष्टयावद्धर्मातिदेशः। एवं चा
नहत्वार्थैलक्षणयाव्रीहियवकृष्णलनीवारादिषुतुल्यवदेवावघातविधिरितीहापिनावघातेऽतिदेशः साक्षादुपदेशात्। तथा च प्रकृतावव
घातबाधेपि विकृतौ न तद्बाधः। प्रकृतिविकृतिन्यायप्राप्तस्यैव प्रकृतिबाधे विकृतिबाधात्। ननु नियोगसाधनसतुषद्रव्यत्वेनैवानहत्वार्थे
लक्षणास्तु तथा चाप्रसंगएव न तु बाधः निषेधस्य प्रसंगपूर्वकत्वात्। मैवं। व्रीहिनिर्यजेत व्रीहीनवहंति व्रीहीन्प्रोक्षति इत्यत्र यागावघातप्रो
क्षणानां सामानाधिकरण्यं न तु श्रूयते तत्तुल्यप्रकारोपस्थितिं विना न संभवति नवा साकांक्षे चैकप्रकारोपस्थितिर्व्याख्यान च प्रोक्षणा
दावपि सारूप्यं तंत्रमित्येकत्र सारूप्यापवेशोऽवघातेपि न तत्प्रवेशः इति प्रसंगसंभवे बाध एवेति तत्वमिति। यद्यप्युदाहरणयोर्द्वयोर
पि साध्यवैकल्यं। प्रथमे संशयोस्ति न द्वारगोचरः किंतु निमित्तगोचरः। द्वितीये तु द्वारगोचरो न तु संशयः। किंतु बाधः तथापि व्यतिरेकनि
श्चयः प्रतिबंधकः इत्यत्र कृष्णलमुदाहरणं। तस्य निश्चयत्वेन न प्रतिबंधकता किंतु ज्ञानत्वेन यद्विरहनिश्चयो यत्र प्रवृत्तिप्रतिबंधकः त राम
त्र तत्संशयोपीति व्याप्तिस्तत्रैव नावाहनमुदाहरणमिति मंतव्यं। तदुक्तं वल्लभाचार्येण। द्वाराभावनिश्चयवदावश्यके तेरिति। यद्विरहनिश्चयत्र ७

२ आश्रयनिश्चयाभावादित्यत्र निश्चयग्रहणमधिकारानिश्चयार्थं वक्तं तेनिश्चयपदमपुष्कलमधिकाराभावस्यैव संभवादिति। अयं न चैवं स्याह निमित्तक आद्यादावपि नैकवारमोजनादेरंगस्य प्रसंग
इत्यत्र वेरह आपि वेनिवक्त नः स्यमाक्लिष्टेज्ययासमंसान्यमेवनाक्लितथा हिस्ताविकृतिर्वै नैव प्रकृतिधर्म्या(हिया) प्रकृतौ वावाहने निश्चिताधिकारकर्तृकमेवोपकारकं ज्ञानमिति तद्वा क्षेबाधरवन्या
प्योन पुनः कल्पनांतरं मंगलेऽधिकारो न प्रकृतिविकृतिन्यायलभ्यः किंतु कल्पनांतराभ्रान एवेति संशये सत्येवाधिकारः कल्प्यते कल्पनांतरस्यावश्यकत्वात् =२

निव्याप्तेः कृष्णादिप्रवृत्त्यादावेव व्यभिचाराद् इंगडइति निमित्तसंशयत्वे नैवयानि वंधकालं वाच्यं न चेहतास्मन्नवतीति मनसि कृत्य निमित्तसंश
येप्रवृत्त्यावत्तुपपादयति नैमित्तिक इति। आचाराविरोधाचेति। अंगानां वेदिकांगानां प्रधानविधिविधेयत्वं। प्रधानविधिसापेक्षविधिविधे
यत्वं ननु प्रधानबोधकसापेक्षविधिविधेयत्वे नियमो लाघवान्ननु प्रधानबोधकस्य विधित्वमित्यत आह नचेति एतदपि नास्तीत्यर्थः। एकदेश
: सापेक्षः। नन्वेकलाघवे नाग्रेपि विधित्वंत्यज्यतामित्याह प्रधानेति। यागादीति यागादिप्रधानं। विशेषणस्तत्त्विधिर्विनेति पूरणीयं। अतो
देवतावाहनादीनां नैकांतः। असाधारण इति। अत्र वदंत: प्रत्येकनियमुपदत एव साधुः विशिष्टे व्यर्थविशेषणत्वात्। न चापूर्वेजनकत्वमा
त्रे शिखाबंधने व्यभिचारीति वाच्यं। विशिख इतिश्रवणेन सदेति श्रवणेनं प्रयोगांगत्वात् सनप्राणायामादौ रोगपातकनाशकांगे असाधार
णत्वमात्रं व्यभिचारीति विशिष्टनियमः। सदेति वचनात् सर्वकालीन शिखाधारणं प्रधानं शिखाबंधनं कर्मांगमिति विभागो ऽन्यथा शिखा
या एव हि रूप्यानुपपत्तेः। फलांतरसत्त्वासत्त्वयोः प्रधानांगत्वाव प्रयोजकयोरेकत्रासंभवादित्यन्ये। तस्मात् व्यभिचारान्न तदंगमिति। न
नु व्यभिचारः समाप्तिमात्रे तथात्वेपि विघ्नस्थलीयसमाप्त्यवच्छेदेन व्यभिचाराभावात्। सतिविघ्ने तस्यांगत्वादिति ग्रंथपर्यालोचनया

मसाधारणांगत्वं प्रतीत्या तस्याश्च पत्न्यापूर्वोत्पत्तिकालस्थापितयाव्यापारकल्पनायोगात् न च प्रत्येकनियमे मंगलस्यासाधारणतयाश्रवानदेशकालान्वयापत्तिः तस्य क्रियामात्रांगत्वादिति वाच्यं तत्रानृत एवेत्यग्रिम
विरोधाच्च तथाहि तत्र शिखायाः कालान्वयः प्रतीयते शिखायाश्चांगत्वेन कालान्वयनियमात् तस्मात् शिखाबंधनं मंत्रविशेषविधिष्टा [illegible] शिखांगेनस्थातिष्ठेत् तयाऽपूर्वजनकं कालानन्वयियेति। अको विशिष्टनियमः न
साधारणत्वमेव [illegible] क्लेशोवादिहेतुमज्जहणादाव नैकांतात् नहि तस्य साधारणत्वं भागमादावन्वयात् नाप्यपूर्वजनकत्वं प्रतिबंधकाधर्मध्वंसरूपत्वात् बुद्धिपदार्थस्य अपूर्वजनकत्वं वा पूर्वद्वारांगत्वमितिभावः [illegible]

प्र·प तथा विशेषणाभावात् । न च समाप्त्यानन्तरीयतदनुमानमिति ग्रंथविरोधः । विघ्नध्वंसस्य च कालविशेषणानिश्चयस्यापि क्वचिद्भावात् । न चेदं स
८ माप्यतामिति कामनया सदाचारादनुमिताश्रुतिः समाप्तिकामो मंगलमाचरेदित्यादिकैवेति न तः समाप्तित्वमवच्छेदकं प्रतीतं न लभ्यत इति
वाच्यं । निर्विघ्नसमाप्यतामिति कामनया तदाचारान्निर्विघ्नसमाप्तिकाम इत्याद्याकारिकायाएव श्रुतेः कल्पनात् । अस्तु वा समाप्तिका
म इत्याद्याकारकश्रुत्यनुमानं नैतावता समाप्तित्वावच्छेदकत्वलाभः ननु शाब्दसामर्थ्यात् । स्वर्गत्वाश्वमेधजन्यत्वसामानाधिकरण्यमात्र
मेव हि शाब्दं नान्यत्रापि प्रतीयते न तु स्वर्गत्वस्यावच्छेदकत्वमपि असामर्थ्यादसंभवाच्च । स्वर्गत्वस्य तदजन्यवृत्तित्वात् अतिप्रसक्तत्वात्तद्
दिहापि सामानाधिकरण्यमात्रं प्रतीयते तत्रावान्तरजात्यवच्छेदकत्ववत् निर्विघ्नसमाप्तित्वमवच्छेदकं कल्प्यतामिति को दोषः । न च स्वर्ग
पदं विशेषपरं इहापि समाप्तिपदे तथात्वस्य सुवचत्वात् । वस्तुतस्तु तन्त्रस्य विशेषपरत्वेपि न हेतुताग्रहे तदुपयोगः तद्ग्रहेण तत्परत्वनि राम
श्चयात् अगृहीतायां तस्यां जातिभेदएव न मानं कृतत्वरूपे । ननु कार्यतावच्छेदकेऽगृहीते अतिप्रसक्तधर्मसामानाधिकरण्येनापि का ८
रणताग्रहो यद्दिशा दृष्टो ग्रन्थ एव न प्रत्यक्षोपीति चेन्न । ग्राहकाभावात् । अन्वयव्यतिरेकौ हि तत्र तद्ग्राहकौ न चातिप्रसक्तेन व्यत्या

ह्निनादंडान्यद्व्यतिरेकग्रहो यत्र दंडाभावस्तत्र घटाभावो वा नाभावात्। यत्र घटस्तत्र दंड इति नियमाभावाच्च। अत एव यत्र ग्राहकं तत्रा
नित्यत्वाभावे सामानाधिकरण्येन तत्फलजन्यत्वमपि वह्नौ सुग्रहं। समानप्रकारकं हि विरहज्ञानं समानप्रकारकान्वयज्ञानविरोधित
यावत्स्वर्गत्वं वह्नित्वावच्छेदेन व्यभिचारग्रहात्तदवच्छेदेन नियतपूर्ववर्त्तित्वं माग्राहि तद्धर्मश्च यद्धर्मिणि तु हेतुताग्रहे किं बाधकमिति।
अत्राहुः विघ्नाभावस्य द्वारत्वे कामनायां तदवश्लेखापत्तेः। अन्यथासिद्धत्वात्स्वर्गकामनायामपूर्ववत्। न च विघ्नाभावजन्यसमा
प्तौ व मंगलजन्यत्वात् फलतावच्छेदकोल्लेखनियमात् कामनायास्तदुल्लेखो न द्वारतयेति वाच्यं। श्रौतधर्मावच्छेदेनैव हि वैदिके
कामनानियमात्। अन्यथा स्वर्गत्वस्य फलतानवच्छेदकतया स्वर्गत्वेनापि कामनोल्लेखानुपपत्तेः। वस्तुतो विघ्नाभावः कार्यतावच्छे
दक एव न जनकतावच्छेदकस्तयोर्विरोधात्। न च विघ्नपूर्वकतामात्रमवच्छेदकं अतिप्रसंगात्। नापि मंगलसमानकालविघ्नध्वंसजन्यसमा
प्तित्ववत् स्वसमानकालीनमंगलपूर्वकत्वमात्रमवच्छेदकं प्रतिबंधकस्य कार्यविशेषनियतत्वेन समानकालीनसमाप्तिद्वयेऽन्य
तरप्रतिबंधकविघ्ननिवर्त्तकमंगलस्यापराजनकत्वे नातिप्रसंगतादवस्थ्यात्। अन्यथा काशीमरणादीनां तत्तज्ज्ञानविशेषजन्य

मतय४

प मोक्षहेतुत्वं न वेघ यथाश्रुतश्रुतिसमर्थनेन तत्त्वज्ञान एवोपदायं कल्पयित्वा हेतुताबोधिकाश्रुतिः प्रयोजकपरतया न समर्थिता न च तत्
ई त्वज्ञानविशेषो नोपस्थित इति वाच्यं। तर्हि तत्रापि काशीमरणादिहेतुत्वापत्तेः। उत्तरकालकल्पनायदितद्वासमानं। न तु ज्ञानविशेषजन्य
त्वं मोक्षमात्रे कुत्रैर्हं मोक्षविशेषे च स्फुरितितदवच्छेदेनैव हेतुता किमंतर्गडुना ज्ञानेनेति तु न यथा व्यापारो नावच्छेदक इति चेत् तुल्यो न तु का
शीमरणादिज्ञानविशेषयोः हेतुहेतुमद्भावग्रहएव तदवच्छेदकत्वग्रहः थं कान्तथा ज्ञानविशेषजन्यत्वस्यापि प्रसक्त्या न दोष इति तदव
स्थात्। तथा च तद्ग्रहाशक्यत्वे च तदवच्छेदकं शक्यत्वे वाऽन्यं प्रति पूर्ववृत्तित्वग्रहात् जनकं प्रति एवं च वृत्तित्वग्रहाशक्यत्वे यासिद्ध तथा हेतु
ताघाने वकाघाह इति चेत् इदमपि तुल्यं। वस्तुतः काशीमरणादिहेतुताबोधकश्रुत्यादेः प्रत्यक्षतया तत्तद्धेतुतायां कापि प्रकृते हेतु
ताबोधकानां बहुलत्वं तत्र तदधीनमवच्छेदककल्पनं। तथाहि न तावत्तत्त्वबोधिकायाः श्रुतेः निरुक्ति किं त्वाचारेण परिकल्प्या। न चा
चारो हेतुताधीनो येन तद्बोधकवेदमाक्षिपेत्। किंतु कारणकारणेपि प्रवृत्तिदर्शनेन फलान्वयव्यतिरेकशालितज्ञानस्य तद्धेतुत राम
याते न विनाऽनुपपद्यमानस्तज्ज्ञानकः सचोनयथासं नवनकार्यतावच्छेदकं कल्पयति। किं तु स्वतन्त्व लाघवाच्च समाप्तौ विघ्नाना ९

वं तन्मात्रे मंगलमित्येवालं विस्तरेण । अन्यथा मणिकृतजन्यताहादौ मण्यवयवविभागस्यापि हेतुतापत्तेः । अत एव का॰॰रीरीतः यत्
यावग्रहनिवृत्तिमात्रं हेतुस्तत्स्वकारणादेवेति सिद्धांतः । अन्यथा नाशककारीत्वापत्तेः । प्रतिबंधकसंसर्गस्य कार्यपूर्ववर्त्तितायहानं नत्रं
तज्जनककारीरीमंगलयोः पूर्ववर्त्तित्वग्रहेण कुलालपितृवद् अन्यथासिद्धत्वाद् यादेस्तत्वाग्रहादिति साधूक्तं व्यभिचारान्न तदंगमिति । वि
हितेति । अत्रातिशयत्वमदृष्टत्वं न च विहितपदवैयर्थ्यापत्तिः व्यभिचारात् फलस्य दृष्टरूपत्वात् । न च तदेवास्तु न तु प्रधानपदमंगापूर्वव्य
भिचारात् ॥ वस्तुतस्तु नत्वेन जनकत्वं विवक्षितं अन्यथा शिखोपवीतधारणादेरपि दोषव्यभिचारात् तत्स्यांगप्रमादजन्यरूपत्वात् ।
अत एवाजन्यपदस्य सार्थकता । अपूर्वविशेषं प्रति विहितप्रधानत्वेन वजनकत्वात् । अपूर्वसामान्यं प्रति विहितत्वेनेति भावः । मपसंचा
रवदृष्टिमदुक्तव्यापारमदृष्टमेव घटयेदित्यरुचेराह अपि चेति । अत्रापि यद्यपि मंगलस्य समाप्तिविशेषं तदन्यविशेषसमाप्ति
सामान्ये वास्तुकृतसंपन्नादेर्हेतुत्वादेकविषयत्वाभावान्नैकल्पिकता तथापि विघ्नाभावस्यानवच्छेदकतया विशेषांतरासंभवेन नि
विघ्नाभावे तयोः पूर्वमानानाभावाद्वाचार्यप्रकारोपघटतरतिभावः । न तु जातिभेदकल्पनायाम विशेषाद् अश्वमेधवाजपेययोः स्वर्गजनकत्व

प किं न विकल्पः । मैवं । वाशंक्यानन्तरकोटिप्रविष्टेपवादिनायत्रान्यतरसत्त्वमपरकार्येत्यस्ति प्रतिबंधकं तत्र विकल्पो नेतरस्मिन्निति वस्तु
१० स्थितेरिति । यद्यपि वाशब्दोत्र नास्ति तथाप्येकसाधनावरुद्धतया विकल्पपुरस्थाएवाकांक्षायाः संनवेन तथैव हेत्वंतरान्वयादिति भावः । अथ
[illegible]सतीति । यदा यदवच्छिन्ने सति यदधिकरणक्षणोत्तरक्षणे यदवच्छिन्नाधिकरणक्षणोत्तरक्षणे वा यदधिकरणत्वं तदवच्छिन्नाधिकर
णत्वं तदनधिकरणक्षणोत्तरक्षणे तदनधिकरणत्वं तदवच्छिन्नानधिकरणक्षणोत्तरक्षणे तदवच्छिन्नानधिकरणत्वं तदा तदेव तद
वच्छिन्नस्य तदवच्छिन्नजनकत्वं अस्ति च दंडे तरसकलसमवधाने तज्जातीयाधिकरणक्षणोत्तरक्षणे घटजातीयाधिकरणत्वं तदनधि
करणक्षणोत्तरक्षणे घटजातीयानधिकरणत्वं तद्वदेव यावद्विघ्नहेतुसमवधाने मंगलत्वावच्छिन्नाधिकरणक्षणोत्तरक्षणे विघ्नप्रा
गभावत्वावच्छिन्नाधिकरणत्वं तदनधिकरणक्षणोत्तरक्षणे तत्प्रागभावानधिकरणत्वं तथा चोभयत्र नेदानाचारतज्जन्यत्वमविशि
ष्टं एतच्च यद्यन्यथासिद्धसाधारणं न दा तदन्यत्वेनापि विशेषणं । एतेन यथाश्रुते अमंगलस्य प्रागभावाधिकरणत्वं तानाद्यविकल्पेन प्रकृतानव्या राम
प्याकाशादिव्याप्तिप्रसंगः मंगल एवमपि प्रागभावसत्वेव्यभिचार इत्यादिदूषणमनवकाशमिति दिक् ॥ एवं निर्विघ्नमिति निरःसं १०

नित्यत्वमित्यात तद्ग्रहे बाधः तत्तुल्यसामग्र्या तयोर्विषयत्वानावात् ज्ञानस्य विषयत्वे व्याप्ते घटस्य विषयत्वे व्यापकतावच्छेदकत्वस्य तत्र तत्र त्वा
दनहि व्रमाशङ्के प्रमात्वे तदाश्रयसाधारण्येन ज्ञानत्वं घटे ज्ञादौ ध्येय ज्ञानघटसाधारणी व्याप्तिरेकास्ति व्यापकतावच्छेदकेन समं व्याप्ते रसं
न वाधिनि ... पपन्ने इदं घटज्ञानं नवमिति विपर्ययस्य ... सहित ज्ञानग्राहकत्वेन बाधः स्यादत उक्तमप्रामाण्यग्राहकतेति तत्र ग्राहि
कायास्तस्या अप्रामाण्यग्राहकत्वादित्यर्थः न च गुरुमतेऽप्रामाण्याप्रसिद्ध्या तद्ग्राहकत्वमसिद्धं अप्रामाण्यस्य व्यधिकरणप्रकारकत्वस्य तन्मतेऽप्रसि
द्धेः तन्नः स्मर्यमाणस्य तस्यानुभूयमानस्य ... तन्मतेऽसंसर्गाग्रहे अन्यमतेऽन्यथाख्यातिरित्यत्र तदेव सर्वसाधारणं यदारोपविषयसाधा
रणधर्मिनिग्रहप्रतिसधर्मे ... प्रामाण्ये ... क्रमप्रामाण्यासंसर्गाग्रहे आमाण्याग्रह इति अत्र चाप्रामाण्यग्राहकत्वमप्रामाण्यग्राहकसामग्र्या अनव हि
नत्वं यथाकृति ज्ञानान्तरं नवस्या प्रामाण्ये ... नाप्रामाण्यग्राहकत्वस्यासंभवादिदं ज्ञानमप्रमेत्यत्रापि प्रामाण्याग्रहेण बाधनादवस्थानात्तदयग्राह्य
माण्यज्ञानप्रामाण्यग्रहस्तत्र ताहृशग्रहस्याप्रामाण्यग्राहकत्वमसिद्धमिति तत्कारणाभावेन न चाप्रामाण्यग्राहकत्वमपि लभ्यते इत्येतेषु च प्रामाण्यं ग
ह्राति न तत्राप्रामाण्यं किंतु तद्विषये तस्येति वक्तीत्यनुपपत्ति नादरणीयः गुरुमते ज्ञाने व्यधिकरणप्रकारकत्वाभावेन पक्षधर्मस्य बाधितत्वात् न च तन्म
तेऽन्यथाख्यात्यभावेन सप्तमीसमासादरे ... चाप्रामाण्यासंसर्गाग्रहस्तत्राप्रामाण्याग्रहेण न दोष तादवस्थ्यं तथैति हि सप्तम्यर्थो न विषयविषयीभाव

प्र०प० ११

[illegible] संशयाप्रसङ्गः तथा च तेनाऽगृहीतासंसर्गा प्रामाण्याग्राहकत्वं पर्यवस्यतीति तथा च न पूर्वोक्तबाधावकाशः न चा[illegible] न संशयानुपपत्तिदोषानुपपत्तिः प्रा
तप्रामाण्यस्मरणे धर्मितावच्छेदकसति संशयानुपपत्तिर्वैस्यमाणत्वात् । वस्तुतस्तु विषयीभूताप्रामाण्यग्राहकत्वेनाप्रसिद्धिर्मा भूदिति तदुपादानेन घटते प्रामा
ण्यस्यापि प्रतिवादिनमन्यान्यत्वेनाप्रामाण्यगोचरज्ञानप्रामाण्यस्य पक्षीकृतस्य प्रामाण्यग्राहकसामग्र्यासमवहितसामग्रीग्राह्यत्वस्य सत्त्वात् तत्र प्रामाण्य
पदस्य प्रामाण्यविरोधिमात्रपरत्वात् न चाप्रामाण्यवत्त्वप्रामाण्यप्रकारकत्वस्य ग्राह्यप्रामाण्यस्य विषयीभूताप्रामाण्यं विरोधि अन्यथा यत्र भावत्व[illegible]
माण्यं न कोऽपि न वा तु प्रामाण्याभाव[illegible]प्रकारकत्वव्यधिकरणत्वमारोपितं न चापि प्रामाण्याग्राहकेण बाधनात् व्यस्यात् तस्माद्धर्म[illegible]
वत्त्वे किंचित् प्रामाण्यारोपेऽपि संशयेऽप्रामाण्य[illegible]प्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वमसिद्धं तद्वारणाय न दिति तथा च तद्देशे प्रामाण्यग्राहकत्वा
ग्र्यासमवधानं[illegible]प्रतीसमानमेव[illegible]तेनाप्रामाण्यपदस्य प्रामाण्यविरोधिवचनतया तस्याप्रामाण्येन प्रामाण्यविरोधीत्यर्थः इत्यत्र
यामर्हतीति[illegible] तज्ज्ञानविषयकेति तज्ज्ञानविषयकत्व[illegible]कापयुक्तव्यतिरेकाप्रतियोगिज्ञानप्रकारेण वेत्यर्थः तेन तद्विषयके[illegible]ज्ञानजन्य राम
त्वात् तदनुमितितदनुव्यवसायादीनां तन्मते विधिकोटि[illegible]ताहशेश्वरज्ञानज्ञेयत्वेनापि[illegible]सामान्यलक्षणप्रत्यासत्तिजन्यप्रत्यक्ष[illegible] ११
त्वेन च[illegible]ईश्वरज्ञान[illegible]जत्वेन कार्यजन्यत्वप्रयोजकाभावाप्रतियोगित्वात् न च समानाधिकरणतदन
तदप्रयुक्तव्यतिरेकाप्रतियोगित्वात्

णाय । प्रत्येकमेव विधिरिति । नन्वेवमनुगतहेतुतावच्छेदकाभावे विघ्नध्वंसं प्रति कारणत्वासंभवः कार्यत्वावांतरभेदो नास्त्येव येना
नुगतस्यैव कारणत्वमिति ॥ अत्राहुः ॥ नतिनाश्यजातीयो विघ्नो न स्तुत्यादिनाश्य इति तत्तज्जातीयनाशत्वमेव कार्यतावच्छेदकं न
तित्यादिकं हेतुतावच्छेदकं वक्तनउक्तरीत्या कार्यकारणभावमात्रे शक्तिसामर्थ्यमवच्छेदकं कल्पनालोत्तरकालिकी तथा च विघ्नध्वंस
त्वेन कार्यता विघ्ननाशकत्वादिना वेदविहितत्वमेव हेतुतावच्छेदकमित्येवोचितं । अपूर्वजनकतायां कालान्तरीयकार्यानुगुणतया
विहितत्वं वह्निति सारं । कामनया कामिकर्त्तव्यत्वेन । न तु विघ्ननिवर्त्तकतयेति । उक्तनामिति । न होमांतरविधिर्वाक्यभेदापत्ते स्वादृपा
लाभाच्च किं त्ववादः न च विधिं विना सहति विनिपातानाव फलकहोमजिज्ञासायां नित्यवलात् प्राप्त मापाउत्पाद फलकस्याग्निहो
७ त्रस्यैवाधमवाद इति निश्चीयते तथा च न पदस्य तदंशुरोधेन प्रागभावपरस्य ध्वंसपरत्वे वाक्यभेदापत्तिः तत्साहचर्यात् प्रागभावप
रत्वेपूर्वकं पृथगेवेति यद्वाग्निहोत्रस्यापि मानां नरात्पापक्षयजनकत्वं ज्ञायते तथापि वाक्यभेदोग्निहोत्रानुरोधेन विनिपातपदस्य
पापसामान्यपरत्वात् मंगलानुरोधेन च प्रारब्धप्रतिबंधकविघ्नपरत्वादिति भावः अथ शब्द इति यद्यप्यथशब्दो ग्रंथान्तर्गतः कथं मंगले

प्र.प
१२

तस्य तज्जन्यत्वात् तथापि तदुच्चारणे हेतुज्ञाने तत्र मंगलं तद्विहितो वेन वार्य्यंथ इति वदंति मंगलप्रकरणं समाप्य प्रेक्षावत्प्रवृत्त्यंगे निःश्रेयस
फलवदाधिविषयीसंबंधं प्रदर्शयन्नेवादौ तर्यपरोणप्रयथत्रह्नं मंगलाचरणपूर्वकं तदभिधेयमाह अथ जगदेवेति माध्यमिकः प्रत्यवतिष्ठते
ननु प्रमाणादीनामिति ननु प्रामाण्यग्रहो न प्रवृत्तिहेतुर्व्यभिचारादन्यथासिद्धेश्चेत्याशंकते अथेति। न च यस्येति यद्व्यतिरेकज्ञानमात्रं यस्य प्रति
बंधकमित्यर्थः। सामान्येन नियमलाभार्थं तु यद्यत्तु पादं प्रत्येकनियमे तु प्रथमे व्यभिचारसंशयमात्रप्रतिबंधे व्याप्तिज्ञाने व्यभिचारात् द्वि
तीयेऽयोग्यतानिश्चयमात्रप्रतिबंधे शाब्दज्ञाने व्यभिचारात् निश्चयत्वेन जनकत्वस्य निश्चयाभावे कार्याभावस्य वा साध्यत्वमिति विवक्षित
मतो न दोषः यथाश्रुते व्याप्तिज्ञाने पुरुष व्यभिचारासंस्पर्शात् अव्यभिचारग्रहेपि व्यभिचारनिश्चयस्य प्रतियोगिज्ञानत्वेन कारणत्वात् वस्तु
तो निश्चयत्वेन हेतुताविवक्षायामयोग्यतासंशयजन्यशाब्दज्ञानविशेषे असाधुत्वनिश्चयप्रतिबंधे शाब्दज्ञानसामान्ये हि ...नीयकल्पे व्य
भिचारो वक्तलेप एव। वस्तुतस्तु व्यभिचारज्ञानस्य प्रतियोगिज्ञानतया जनकत्वेन निश्चयस्तत्र हेतुरिति प्रत्येकनियमः सम्यक् स्यादि
ति प्रत्येकनियमेऽव्यभिचारसंशयमात्रप्रतिबंधेऽव्यभिचारज्ञानेऽव्यभिचारनिश्चयाजन्ये अबाधव्यतिरेकनिश्चयमात्रप्रतिबध्यायां त

रा.म
१२

ज्ञानजन्यायामनुमितौ व्यभिचारांशेऽदृष्टत्वस्तेन सर्वं सम्यक्। अत्र च ग्राह्याभिन्नत्वेन निश्चयविषयो विशेष्यो ऽतो न व्याप्तिव्यतिरेकस्तानप्र
तिबध्ये व्याप्तिज्ञाने व्यभिचारः वस्तुतस्तस्य व्यतिरेकनिश्चयो यत्र प्रतिबंधक इत्येतावन्मात्रे कृते तथात्वभागे व्यभिचारो तो यत्संशये तत्र ग्राह्य
संशयस्याप्रतिबंधकत्वात् तावन्मात्रे च कृते व्यभिचारसंशयप्रतिबध्ये व्याप्तिग्रहे व्यभिचारस्तु न च स्वरूपात्तेन तत्र व्यभिचारव्यतिरेकनिश्च
यस्याप्रतिबंधकत्वात् न चाव्यभिचारसंशयतदभावनिश्चयप्रतिबध्ये ऽव्यभिचारनिश्चये ऽव्यभिचारनिश्चयाजन्ये व्यभिचारः यत्संशयत्वं
दर्थतदभावत्वप्रकारकत्वानियतयोः संशयव्यतिरेकनिश्चययोः प्रतिबंधकत्वमित्यर्थात् अन्यथाप्रमेयत्वेन तदभावावगाहिना प्रतिबं
धेः अस्ति च व्यभिचाराभावत्वप्रकारकत्वानियमो व्याप्तिज्ञानप्रतिबंधके व्यभिचारसंशये प्रकृते च व्यभिचाराभावाभावत्वात् इत्याद्यभि
चारत्वस्य लाघवेन तत्प्रकारकत्वेनैव प्रतिबंधकत्वे स्थिते व्यभिचाराभावाभावत्वाप्रकारके व्यभिचारनिश्चये व्याप्तिज्ञानप्रतिबंधके तदभा
वात् न चाव्यभिचारात्मकतया व्याप्तेरनुमितावपि तदभावत्वप्रकारकतया प्रतिबंधकत्वाभावात् न तथात्वमिति वाच्यं तत्र सामानाधिकरण्यमा
त्रस्य भावनया तदभावत्वप्रकारकत्वेनैव प्रतिबंधकत्वादिति सारं प्रकृते तिपदोपादानं च प्रकृतानिप्रायेण न तु व्याप्तिप्रविष्टं अनुमितौ व्याप्तेरिव

प्र·म तिदृष्टांतविरोधादिति भावः प्रामाण्यसंशयानंतरमिति तथा च प्रवृत्तिमात्रे व्यभिचारेऽपि विशेषेऽन्यथासिद्धिर्न दोषाय प्रयोजकत्वमात्रस्य
१३ स्कपगमादिति भावः ज्ञानप्रामाण्यमिति कारणनिष्ठप्रामाण्यभ्रमनिरासार्थं ज्ञानपदोपादानं ज्ञानपदस्य भावव्युत्पन्नस्याप्रसिद्धत्वादिति
वदंतः तत्र प्रामाण्यपदस्य तद्वति तत्प्रकारकत्वादिरूपविशेषपरत्वे भ्रमासंभवात विशेष्यावृत्त्यप्रकारकत्वादिरूपसामान्यपरत्वेऽज्ञातो
पपसंगादिति वस्तुतः प्रामाण्यपदं न प्रमाणत्वविधर्ममात्रपरमेशानो बाधात् अनुव्यवसायगोचरत्वं ज्ञानगोचरत्वं परतो वेति विवादानापाच तद्वति तत्प्र
कारकत्वादिपरं तच्चैकाटत्ति नयथोक्तसाध्यवदिति बाधवारणाय ज्ञानपदं तेन ज्ञाननिष्ठस्य तद्वतीत्यादेर्लाभ इति न च घटत्ववतीत्यादि
:पक्षीकृतस्य ज्ञानेऽकासाधारण्येन इष्टापत्तिरिति नापद्येऽपि यावत्ज्ञानग्राहकग्राह्यत्वं साध्यमस्ति च ज्ञाननागोपक्षीकृतप्रामाण्यग्रहेऽपि
प्रमादिति वाच्यं यावद्ज्ञानग्राहकग्राह्यत्वे हि यावत्स्वाश्रयग्राहकग्राह्यत्वे घटज्ञानपटज्ञानग्राहकाभ्यामन्योन्यप्रामाण्याग्रहेण यथाश्रुते
बाधात् न चैवमप्रिम विप्रतिपत्त्यनेदः विशेषणप्रक्षेपाप्रक्षेपाभ्यामत एव पक्षसंकोचासंकोचाभ्यां भेदसंभवात्। तथा च ज्ञानाविशेष प्र·म
णबाध एवेति सूक्ष्मं तदर्थं ज्ञानपदे विशेषणमिति यदि लिखितायामपि तद्ग्राहकेण तद्धर्मग्रहस्तदा ज्ञानांतर्गतीवोक्ततयाऽगृहीतप्रामा १३

ष्यज्ञानसमानविषयकेऽप्रामाण्येबाध एव वस्तुतस्तु ज्ञानद्वयोर्नैकं प्रामाण्यं तन्मते सिद्धासिद्धभेदेन तयोर्विषयभेदात् तथा च ज्ञान-
विशेषितस्य तद्वतीत्यादेः सामान्यतरेण साधारण्यस्य पक्षत्वेन तदाश्रयज्ञानाप्रसिद्धेरेव यावत्तदाश्रयज्ञानस्याद्घटकघटत्वमेशो बाधि-
मिति ज्ञानपदोपादानमिति तत्त्वं केचित्तु ज्ञानपदानुपादाने अत्र जन्यत्वगर्भप्रामाण्यप्राप्तौ स्मृतित्वादृष्टान्तपक्षतानैस्फूर्तौ तन्मते परतो-
त्वप्रामाण्यस्यमीमांसकादिति ज्ञानपदोपादाने तेन ज्ञानसामान्यप्रामाण्यं पक्षीलभ्यतदत्वाङ्कः। निगर्वस्तु प्रामाण्यपदं समर्थप्रवृत्तिजन-
कतावच्छेदकपरं तेन सर्वसाधारणपक्षलाभः घटादित्यादिघटसजातीयत्वं च साध्यं तेन नांशतो बाधः अत एव करणनिष्ठतादृशधर्मे बा-
धकारणाय ज्ञानपदमिति। वस्तुतस्तु प्रमापदं प्रवृत्तिनिमित्तमेवोक्तयसिद्धं पक्षः अत एवाधुनिकप्रमापदप्रवृत्तिनिमित्ते बाधात् तज्ज्ञा-
नपदमिति तत्त्वं। ननु धर्मिणोऽन्यथा वादिसिद्धस्यैव पक्षत्वेन चेह धर्म्यनुपसिद्धः प्रकारत्वगर्भत्वात् प्रामाण्यस्य तस्य च भासमानवैशिष्ट्य-
प्रतियोगित्वरूपत्वात् न च परमते विशिष्टविषयो वैशिष्ट्यविषयः अगृहीतासंसर्गधर्मधर्मिविषयकैकज्ञानस्य तथात्वादिति मैवं न हि त-
त्रापि धर्मधर्मिपदं वास्तवतत्परं व्यवच्छेद्यसहत्वं वनाव्यवच्छेदस्य चस्य माणत्वात् किं तु स्वमते सिद्धप्रतियोगित्वानुयोगित्वादिरूपस्व

प्र॰प्र॰ १४ रूपसंबंधविशेषरूपधर्मत्वादिपरं तन्मते विशिष्टधियो विशेषणविशेष्यात्मकस्वरूपसंबंधविशेषविषयत्वात् तथा च तत्प्रकारकत्वं तद्धर्मि-
त्वविशेषणावच्छिन्नत्वमिति किमनुपपन्नं अत्र ज्ञानप्रामाण्यपदेन तद्व्यक्तिपरे सामान्येनोपन्यासोपस्थापकेन तत्त्वेकं साध्यमिति संबंधो लभ्यते अतो अप्रा-
माण्यग्राहकेणापि स्वप्रामाण्यं गृह्यत इति गुरुमते ऽप्रामाण्यग्राहकपदमनर्थकं न भवतीति ध्येयं इदं तु मीमांसकत्रयसाधारणी विधिको-
टिः गुरुनये स्वप्रकाशादिना मुरारिनये अनुव्यवसायादिना भट्टनये ज्ञाततालिंगकानुमित्यादिना यावद्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य सर्व-
साधारणत्वात् तत्सिद्धिश्च तज्ज्ञाननिष्ठयावद्वस्तुलक्षणाज्ञानत्वेन तत्सिद्धिरिति गुरुमते तन्मते स्वत्वं ज्ञानस्यैवानुमतत्वेनानुमवप-
देन ज्ञानत्वोपस्थितेरिति यावत्पदं वा शेषपरं तेन स्वविषयकत्वनियततज्ज्ञानग्राहकसामग्रीकत्वं पर्यवस्यति नोपस्यैकैकज्ञानग्राहकसा-
मग्रीतत्प्रामाण्ययोर्नांशतो बाध इति ध्येयं अत्र केचित् ज्ञानपदेन यत्किंचिज्ज्ञानपरं प्रत्येकप्रामाण्यस्य पक्षीकृतस्य प्रत्येकतदाश्रयीभूतज्ञान-
ग्राहकसामग्र्यग्राह्यत्वेन बाधात् किंतु तत्प्रामाण्याश्रयीभूतज्ञानपरं तथा च मुरारिमते हमोर्ज्ञानस्यावश्यं वेद्यत्वानियमात् ज्ञायमानज्ञा- प्राम॰ १४
नव्यक्तिविशेषप्रामाण्ये तदाश्रयीभूतज्ञानग्राहकसामग्र्यप्रसिद्ध्या तद्ग्राह्यत्वसाध्याभावेनांशतो बाधापत्त्या पक्षसंकोचस्यावश्यकतया

तत एव प्रकृतेपि सामंजस्यात् किमर्थं यथाश्रुतपदार्थमनादृत्य लक्षणाकुसृष्टेरादरः न च तत्र ज्ञानस्य संकोचे प्रमाणं प्रसरे सामग्रीप्रसिद्धौ च तद्
प्रसरे धर्मिण एव बुद्ध्यारोहात् क्वांशतो बाध इत्युक्तयथापि तत्र तेन बाध इति वाच्यं सामान्यतोपि प्रमाणप्रवृत्तौ बुद्ध्यारोहात् न च तावता
सामग्रीप्रसिद्धिः तस्या विलक्षणत्वात् एवानुपदं वक्ष्यमाणत्वादिति तत्र असंकोचे नैवोपपत्तौ तत्कल्पनानौचित्यात् न ह्येकत्र संकोच इत्यन्यत्रा
पि सः किंच तदवरोधाद् ज्ञायमानतानेतरपरतागुरुमतावरोधादेकमात्रग्राहकसामग्रीकेतरपरताइत्येकमेव ज्ञानपदमुत्तनयपरे स्या
त् यदि चैकत्र क्लृप्तसंकोचस्यावरोधाद् व्यत्रापि संकोचकल्पना तदा अप्रामाण्यग्राहकपदमपि लक्ष्यतां ताहशसामग्र्याग्राह्यज्ञानप्रामा
ण्यमात्रपरत्वेनैव बाधविच्छेदादिति सामग्री स्वविषयज्ञानयाहि कामिमनाज्ञानपदेन ज्ञानग्रहे प्रामाण्याग्रहाद्यपोक्तेर्बाधात् नत्वकात्र
घटज्ञानमिति पदजन्यज्ञानेनापि तदग्रहाद् उक्तविवक्षयाप्यप्रतीकारः अत्र कश्चित् तेन प्रामाण्यं ग्रहणत एवेत्याह तन्न्यायमात्राशयः यथा घटेन
जलमाहरेत्यत्रान्वयितावच्छेदकं छिद्रेतरत्वं योग्यताबलात् कल्प्यते न घटेन येनकेनापि [illegible] स्थले विनोजित्वमन्वयितावच्छेदकं [illegible]
ते शाब्दबोधविषयत्वयेहापि ज्ञानत्वघटविषयत्वयोरतिप्रसक्त्या घटत्वप्रकारकत्वघटविशेष्यकत्वयोरन्योन्यान्वयितावच्छेदकयोर्ज्ञान

...श्च यामाण्यग्राहकत्वमेव सामग्र्या असिद्धमिति तादृशशब्दस्यैव मते प्रामाण्यग्रह इति न बाध इत्युन्नीयते तेनैवैतत्संभव ५
प्र॰प धेयोग्यतावलाद्गृहीतयेः शाब्दोपस्थितयोः शाब्दबोधविषयत्वमस्त्यतो वा कथं विषयापदविषयावाननत्र प्रामाण्यग्रह इति कस्यचिद्दूष
१५ णं निरवकाशं न च गृहीतमते स्वराशिमते चान्यथा स्यात्त्वस्याप्यगमात् तद्घटविशेष्यकस्यापि घटत्वप्रकारकज्ञानस्य संनवात्र घटविशेष्यक
त्व[illegible]मन्वयितावच्छेदकमिति वाच्यं अन्वयनियतत्वस्यान्वयितावच्छेदकनियमस्य हि विधेर्वाधकापोद्योऽसंनवहाधकथ
तत्राप्युनियमो न हि मिश्रयोरेवानुरोधेनिमतः अतएवौत्सर्गिकधियो प्रामाण्यमिति वदन्ति तदत्र यदि वाधकाभावस्तदा गुरुत्वं तयोरपि त
दन्वयितावच्छेदकं अपवादवासेन वेति तथाहि नवड्क्तनियमदृश्यमततेदेन तथापि यत्रैतन्नियमावधारणं नास्ति तत्र तादृशशाब्दकारी
त्वापि प्रामाण्यग्रहे बाधता दवस्थात् किंचैककोटिबाधेऽन्यतरप्रकारकतानियमो न तु संशये प्रशस्तरूपवादीनेन इत्यादौ गोत्वादिप्रका
रतापत्तेः तथा च यत्र बाधसंशयस्तत्र तादृशशाब्दप्रामाण्यग्रहे का गतिः। अपि च। अनुमानेन घटज्ञानत्वलिङ्गेन प्रामाण्यानुमाने नापि स्वी
कारः प्रकारांतरगमावात्तथा च तत्र बाधएवेति दिक्। अपरे तु उक्तानिप्रसंगवारणाय तज्ज्ञानप्रकारप्रकारकतया तज्ज्ञानविशेष्यविशे राम
ष्यकतया याज्ञानग्राहिका सामग्री सा स्वविषयज्ञानग्राहिकाविवक्षिता तत्ज्ञानत्वं साध्यमिति वदन्ति तदपि न सम्यक् ब[illegible]तथाहि तज्ज्ञानविशे १५

ष्यकत्वं तज्ज्ञाने किंचित्प्रकारविशिष्टधर्मिविशेष्यकत्वं यत्किंचिद्धर्मविशिष्टतज्ज्ञानविशेष्यविशेष्यकत्वं वा आद्ये सिद्धसाधनं नहि नीदर्शी
ने तादृशसामग्र्या आमाण्याग्रहः किंतु व्यवसायादिसामग्री तादृश्येव नेति वदामहे अंत्ये प्रमेयविशेष्यकं घटत्वप्रकारकं ज्ञानमिति शब्देन वक्त
तो घटविशेष्यके घटविशेष्यकत्वे घटत्वप्रकारकत्वे च गृहीते प्रामाण्याग्रहेण पूर्ववद्दोषतादवस्थ्यं तस्मात्तद्विषयकत्वमेव वाच्यमिति ॥ उच्य
ते ॥ कस्यांचित्सामग्र्यां विषयग्रहनियमः कस्यांचिन्नेत्येतत्सर्वसिद्धं तत्र कस्यापि स्वप्रकाशत्वादितं नं कस्याप्यनुव्यवसायात्मकप्रत्यक्षा
दीत्यन्यदेतत् तथा च या सामग्री विषयनिर्मुक्तज्ञानग्रहे न समर्था विषयं कितमेव ज्ञाने गृह्णाति विषयमविषयीकुर्वती ज्ञानधर्मिग्रहे एव न सम
र्थेति यावत् तद्ग्राह्यत्वं साध्यं शब्दे तु तादृशी सामग्री नास्त्येव नहि तत्र घटज्ञानपदात्मिका सामग्री घटपदं विनापि ज्ञानपदमात्रस्य ज्ञानोपस्था
पकत्वेन तावन्मात्रस्य सामग्रीत्वात् तत्फलोपधाननियतत्वे तोरेव सामग्रीत्वात् इदमेव सामग्रीपदोपादानफलं तथा च पदसमभिव्याहारे
ण तस्य विषयग्राहकत्वं न तु ज्ञानग्राहकसामग्रीत्वेन ज्ञानपदात्ज्ञानोपस्थितौ विषयावेशात् अनुव्यवसायस्वप्रकाशादौ तु ज्ञानग्रा
हकसामग्रीत्वप्रयुक्तमेव विषयग्राहकत्वं येन विना न ज्ञानसत्ता दोषकस्य तद्दोषकत्वनियमात् तथा च यत्र ज्ञानग्राहिकैव विषयग्राहि

प्र०प कानन्तुविषयग्रहार्थमन्यापेक्षायस्यामितिपर्यवस्यतिनाद्दृशीचप्रायशः स्ववृत्तिवर्त्तमानज्ञानग्राहिकैवसामग्रीनवीनतग्राह्यत्वंग्रहे
१६ नानुमानविशेषणाग्रहेपिनिष्पत्तिःयथाचज्ञाततालिंगकानुमानस्यज्ञानग्राहकत्वेनैवविषयग्राहकत्वंतथावक्ष्यामःज्ञानरूपप्रत्यासत्ते
ज्ञात्यत्वादितिस्वयमेववक्ष्यतितेनाप्ययमेवाशयउन्नीयतेसहकार्यंतरप्रवेशेनविषयग्रहेतदुपन्यासानर्हत्वादितिसर्वंसुस्थंननैवंप्रा
नत्पदंव्यर्थंप्रामाण्यानुमितेर्ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकत्वाभावात्तदनंतर्भावेणैवसामंजस्यात्अन्यथाघटज्ञानवानयंतद्वि
छावत्वादित्यत्रापिसविषयज्ञानग्राहकसामग्रीत्वेप्रामाण्यस्यतद्ग्राह्यत्वेनेत्येमपिबाधानिरासादितिचेत्‌नइदंज्ञानंप्रमेत्येवमाका
रिकायाःप्रामाण्यानुमितेःपक्षीकृतज्ञानग्राहिकायास्तद्ग्राहकत्वप्रयुक्तंनहिविषयघटादिग्राहकतायाःप्रामाण्यग्राहकत्वेनयाव
दनंतर्भावेसिद्धसाधनात्किंचपृथिवीज्ञानेतदनुव्यवसायानंतरंपुनस्तत्रैवविषयेपृथिवीज्ञानेजातेतदनुव्यवसायानंतरमि
त्यादिवक्ष्यमाणप्रामाण्यग्राहकस्यापिज्ञानग्राहकत्वप्रयुक्तत्वात्तद्विषयग्राहकत्वसत्वात्सिद्धसाधनंयदिनयावत्पदोपादानंवस्तुत राम
स्तुप्रमाशङ्केनप्रामाण्यग्राहिणायावदनंतर्भावेसिद्धसाधनंतुल्यसामग्र्याप्रामाण्यतदाश्रयज्ञानयोःशब्दात्प्रतीतेःनचघटज्ञानवा १९

[illegible]पादानमेव तदर्थं क्रियतामिति वाच्यं परमते व्यर्थविशेषणत्वात् यथा च प्रयुक्तत्वं तदन्वयाद्यनुविधायित्वं तत्र समयसंबंधित्वरूपमजन्य
स्यापि प्रामाण्यस्य तथात्वेन न च प्रकारत्वविवक्षया अभिधेयत्वसामान्यनिबंधनसिद्धसाधनवारणेपि प्रमेति सामान्यलक्षणाजन्यविषयत्वेन सि
द्धसाधनमिति वाच्यं प्रमात्वं हि नाज्ञातमासत्तिः संज्ञाद्यनुपपत्तेः किंतु ज्ञातं तज्ज्ञानं च प्रमात्वाश्रयज्ञानं विना न संभवति तस्य क्वचित्कत्वात् क्वचि
त्सामान्यप्रत्यासत्तिक्रोडीकृतत्वात्। न च प्रमात्वाश्रयज्ञाने अवश्यापेक्षितेपि न तज्ज्ञानं प्रमात्वसामान्यजन्यज्ञानहेतुरिति वाच्यं इतोपि जन्यपदस्य त
दन्वयाद्यनुविधायिमात्रपरतया व्याख्यातत्वात् न तु प्रयोजकमात्रपरं न तु कारणपरं। न च यत्तत्त्वकाद्यमिति गृहीते प्रमात्वप्रत्यासत्तिस्तत्रैवासि
द्धसाधनपरिहारेपि प्रामाण्यांतरेण तत्र प्रामाण्यमात्रस्य सामान्यजन्यज्ञानगोचरत्वात् न हि सकलतदातदाश्रयज्ञानाभावप्रयुक्तः सामान्यज
न्यज्ञानाभाव इति सांप्रतं यावत्प्रामाण्याश्रयविषयकज्ञानसामान्यजन्यत्वाभावस्य विवक्षितार्थस्य यत्किंचित्प्रामाण्याश्रयविषयकज्ञानजन्यत्वे
नैव बाधात् अत एव योगिज्ञानेनापि न सिद्धसाधनं तज्ज्ञानस्यातीतानागतसकलज्ञानप्रामाण्यगोचरस्य स्वग्राह्यप्रामाण्याश्रयीभूतज्ञानगोच
रनिर्विकल्पकजन्यत्वात् ज्ञानप्रत्यासत्तिस्थलेपि विषयीभूतप्रामाण्यविशिष्टधीजन्यत्वादनुव्यवसायस्य तदजन्यज्ञानग्राह्यताशंकैव नास्तीति

प्र·प सिद्धमनुपपन्नं अत्र च घटे ज्ञानविषयकज्ञानाजन्यपटज्ञानग्राह्यतया प्रामाण्यस्य यत्र किंचिद्विशिष्टग्राह्यत्वं साध्यं तथा च प्रामाण्ये ज्ञानयं समर्थयन्तृ
१८ सिद्धत्वादित्यादिनैव सिद्धसाधनं तन्मते सामान्यप्रत्यासत्त्या ज्ञानग्राह्यं मानवसैरनुमितिजनकज्ञानागोचरत्वादिति वदन्ति तत्प्रतीकारस्तु तत्पक्ष
वह्निनीवदेवेत्युक्तप्रायं न हि सर्वेषां प्रामाण्यानामेवंविधानुमितिविषयतानियमो येन पक्षे एव न जन्यानि एवमन्यत्रापि यत्र सिद्धसाधनमाज्ञाति तत्पक्षे
वह्निरीतमेवेत्यवधेयं पक्षसंकोचस्य सर्वज्ञाने गुणकृतिश्याह ज्ञानानुव्यवसाये तज्ज्ञानविषयकज्ञानजन्यत्वनियमेनावश्यं वाच्यत्वात् ननु तद्वि
शेषवत्तज्ज्ञानविषयकत्वेन विवक्षणीयं स्वप्रकाशज्ञाने सर्वेषां स्वप्रकाशात्मकपक्षज्ञानजन्यत्वात् प्रामाण्यानुमिते तज्ज्ञानतद्विषयकज्ञाना
जन्यत्वात् पुनः सिद्धसाधनापत्तेः अत्र प्रथमज्ञानपदं केवलस्य तत्पदस्य प्रामाण्यप्रत्यवमर्शकतया प्रामाण्यविषयकज्ञानाजन्यज्ञानग्राह्य
त्वं तन्मते ज्ञाने प्रमासमर्थप्रवृत्तिजनकत्वादित्यनुमित्यापि यद्देसंभवति तथा च प्रामाण्यपरतस्त्वेन विवादः किंतु सामान्यप्रत्यासत्तौ तथा च
सिद्धसाधनवारणार्थं द्वितीयज्ञानपदं तदप्रसिद्धिवारणाय व्यापारानुव्यवसायविषयताके [illegible] तादृशिस्त [illegible] जनताज्ञानपदसन्निवेशे तु प्राते
पक्षत्वं विशिताल [illegible] ज्ञानपदं तु मन्मते प्रकारत्वस्य विशेषणत्वपर्यवसितनया व्यापारानुव्यवसि [illegible] ताकेरे वीः परमते ज्ञानस्यापी रामः १८

ज्ञासमानविषयत्वाभावेननयासिद्धसाधनवारणायवक्तव्यत्वाद्द्रव्यघटाभ्यासिद्धेर्निर्विकल्पसाधनमित्युपदर्शितकाकारकत्वेनयात्वेपिसर्वत्रैवंघका
रणाकांक्षितित्वंचनविधिप्रसिद्धिः प्रामाण्यव्यतिरेकाप्रसिद्धिश्च तत्वद्रव्यग्राह्यत्वाभिमताश्रयज्ञानपरत्वेप्रामाण्याश्रयविषयकज्ञानजन्यानुमि
तिग्राह्यतयाअप्रामाण्येप्रामाण्यमात्रपरत्वेनहतोऽव्याप्तिनियतातीन्द्रियविशेष्यावृत्त्यप्रकारकत्वादौनचार्थविशेष्यावृत्त्यप्रकारकज्ञानवानित्या
द्युपमितिविषयत्वात्स्वयुक्तक्रमेणनतत्रापिव्यतिरेकाप्रसिद्धिरितिवाच्यं। तदनुमितिविषयएवप्रसिद्धेः उक्तत्वात्नत्वेवंतर्हिव्याहतत्वप्र
त्वपक्षेविधिप्रसिद्धिर्दुर्लभाविषयज्ञानादौतदाश्रयज्ञानाप्रसिद्धेरितिचेत्। न। ... विषयत्वादावेवतत्सौलभ्यात्। नचैवंसतिप्रामाण्या
प्रामाण्ययोस्तज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वात्तदजन्यज्ञानग्राह्यत्वयोरविशेषात्कथमेकस्यस्वतस्त्वमपरस्यपरतस्त्वमितिविनिगमकाभावा
र्थं ग्रहमाणप्रामाण्यव्यापकमिदंस्वतस्त्वंनतुग्रहमाणाप्रामाण्यव्यापकमितिविवादस्वारीस्यात्। यत्तुतज्ज्ञाननिरूपणाधीननिरूपणेतज्ज्ञा
नसादृश्येतज्ज्ञानवैशिष्ट्यादौव्यतिरेकाप्रसिद्धिः तस्यतज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वादितिमतंतत्तुच्छामहेइत्थमितिज्ञानसदृशीत्य
नुमानेनतज्ज्ञानेतरसादृश्यबाधेनपक्षधर्मताबलेनापूर्वज्ञानसादृश्यविषयीकरणात्। ननुज्ञानेतरसादृश्येतादृशानुमित्यविषयेतत्स

प्र० प
१९

सिद्धिः प्रामाण्यस्य प्रतिज्ञानव्यक्तिनिष्ठनिष्ठात्मकस्य सामान्येन [illegible]णपक्षतायां तज्ज्ञानविषयकज्ञानाजन्यज्ञानयावत्त्वपर्य्यवसितेन साध्येन व्यति-
रेकस्यापि तज्ज्ञानविषयकज्ञानाजन्यज्ञानयावत्त्वाभावात्मकस्य तज्ज्ञानविषयकज्ञानातिरिक्तज्ञानजन्यज्ञानयावत्त्वसाहचर्यान्तरेण असिद्धेः किं-
तु मध्याकृत्वा तन्नचोक्तप्रकारेण साहचर्यग्रहे एव मानाभावः बाधकाभावात् संशयेपि समीहितासिद्धेश्च न च यत्र [illegible]नस्य साहचर्यमनुमितिगोच-
रस्तदन्यप्रामाण्यमेव पक्ष इति वाच्यं तत्र स्वतस्त्वासिद्धिप्रसंगात् उक्तक्रमेण सामान्यपक्षतायां संकोचस्यान्याय्यत्वाच्च वयंतु ब्रूमः सामान्य-
प्रत्यासत्तिजन्यप्रत्यक्षनिबंधनसिद्धसाधनापत्तये यावत्त्व[illegible]प्रकारत्वपर्यन्तपर्य्यवसाने धर्मिण्येव व्यतिरेकप्रसिद्धिः तुल्यताधर्मस्यैव
प्रकारत्वादिति संक्षेपः ननु एवमेव कथमित्यत आह परत इति ननु पक्षसंकोचस्यावश्यकतया असंभवस्थलीयप्रामाण्यस्य पक्षबहिर्भावे नै-
व साध्ये वक्तृविशेषणोपादानं व्याहन्ति नेत्यवतीति मनसि कृत्वाह स्वाश्रयग्राहकेति एवकारो यावदर्थः तेन यावत्स्वाश्रयग्राहकयावत्त्वं
पर्य्यवस्यतीति भावः अतोनैवकारस्य क्रियासंगतस्यात्यंतायोगव्यवच्छेदत्वा[illegible] न समीहितसिद्धिः स्वाश्रयग्राहकजन्यग्रहणकं[illegible]थिप राम
र्य्यवसानिविशेषणसंगत्या अयोगव्यवच्छेदप्राप्तावपि तथा शंखपाण्डुर एवेत्यत्र सर्वशंखव्यक्तौ पांडरत्वे न तु सर्वपांडरत्वयोगः शंख इतिवत्

दे०

तै० त्व २

वे प्रामाण्यव्यक्तौ तदाश्रयग्राहकग्राह्यत्वं ननु तदाश्रयग्राहकाणां यावतां प्रामाण्यग्राहकत्वं न न्यते यतः न च यावत्स्वाश्रयग्राहकपदं स्वाश्रय
ग्राहकपदं तेन यावदर्थः तन्न तस्य विशेषणतयान्यस्यैवायोगव्यवच्छेदलाभ इति वाच्यं तथा सति यथाश्रुत क्रियासंगतैवकारपद [illegible]
त्वात् किं वक्तुना एवं सत्यैवकारोपादानस्यैवानौचित्यादित्यादीनि दूषणान्यनवकाशानि एवकारस्यैव यावदर्थकत्वात् रानच एवं विशि [illegible]
व्यभेदः विशेषणोपादानाश्रपादानाभ्यां ज्ञानत्वेन स्वाश्रयत्वेन च प्रामाण्याश्रयोपादानेन स्फुटं भेदात् एवं चार्थमनसा चैव [illegible]त्यादि प्रामाण्य
ग्रहप्रकारांतरप्रदर्शनस्थले स्वयमाकर एव कथयिष्यति। स्वविषयपदोपादानं त्वव्यर्थं पूर्वोक्तेः यत्तु पदसंकोचे स्वातंत्र्यमेव तथा च [illegible]
पदार्थप्रतिपाद्यज्ञानप्रामाण्यमात्रपरत्वेनाप्युपपत्तेरिति तन्न सर्वस्यैव तथात्वे [illegible] लाभोत्तरं चेदं मतद्वयसाधारणमेव। अन्यथा [illegible]
न स्वाश्रयग्राह्यत्वे नैव सामंजस्याद्व्यर्थविशेषणताप्रसंगादिति मतम् असंगतं पूर्वयोरपि ज्ञानग्राह्यत्व [illegible] ग्राह्यत्वयोरेव साध्ययोः [illegible] नये म
मीमांसकमते नयपदादीनां सर्वथा तत्तद्विशेषपरत्वाद्व्यर्थविशेषणत्वापत्त्या तत्रापि तदवस्थैवापत्तेः साध्ये न व्यर्थविशेषणतावी[illegible]भावात्
किं च स्वाश्रयग्राहकत्वस्य स्वाश्रयादन्यत्रापि सत्त्वेनेह व्यर्थविशेषणतालघ्वव्यवच्छेदेन व्या[illegible]स्यैव व्यावर्त्यत्वे व्यवच्छेदकस्य व्यर्थविशेषणतावी[illegible]ताऽऽरचन

प्र·प
२०

व्याप्यत्वेन व्याप्तिग्रहे प्रमेयत्वेपि तद्व्यापत्तेरिति समाधेरपि समानत्वादिति न त्रिशिरे कदा विवादोत आह स्वाश्रयेति न च स्वाश्रये[illegible]वत्येव कारवै
यर्थ्यं ईश्वरज्ञानस्य स्वत्वेन सिद्धसाधनवारकत्वादिति भावः । नन्वत्रत्येकपक्षे न हृष्टपदे किमनुमितिग्राह्यत्वं साध्यं [illegible] अनुमितिग्राह्यत्वं वा ज्ञान
त्वलिंगकानुमितिग्राह्यत्वं वा आद्ये सिद्धसाधनं द्वितीये असंभवः तृतीये अप्रसिद्धिरितिचेन्न ज्ञानानुमितिग्राह्यत्वं न वेति विप्रतिपत्तेः साध्यमतद्
प्रसिद्धैव न च प्रमाणान्तरमितत्वानुमितिग्राह्यत्वेन सिद्धसाधनं ज्ञानत्वावच्छिन्नव्यापकता[illegible]लिंगकानुमितिग्राह्यत्वस्य तदर्थत्वात् तन
च प्रमाणान्तरत्वानुमितौ न थाततत्र प्रमात्वस्यैव व्यापकतावच्छेदकत्वात् यथा च ज्ञानत्वावच्छिन्नायामपि व्यापकतायां तन्मते विशेषज्ञानस्य था
अनुपदमेव वक्ष्यामः [illegible] मत इति । यद्यपि [illegible] विवक्षितसाध्ये प्रामाण्याश्रयीभूतास्मदादिज्ञानाग्राह्यत्वात्त्वाभावबद्ध्ने साध्यं न बोधयथाप्य
तदपीश्वरज्ञानमादाय प्रामाण्यमात्र एव साध्यसिद्धेरुक्तं [illegible] सिद्धसाधनं तथापि विवक्षितसाध्यस्य सर्वविषयत्ववतिनत्वका
रकत्वप्रामाण्यादौ सत्वेनांशतः इत्युक्तमिति भावः । विशेषणोपनीकृतप्रामाण्य[illegible]स्य तिशेषः इदं चोपलक्षणं जन्यत्वमपि विशेषणं ई राम
श्वरज्ञानप्रामाण्ये सिद्धसाधनं नाद बस्यांशपरमिति योगजादिजन्यत्वरूपवतिनोग्य प्रसिद्धा ततज्जन्यत्वाप्रसिद्धेरित्यर्थः ननु नेदं विशे

षणमुपादेयं किंतु यद्रूपावच्छिन्नत्वं द्रजन्यत्वमनयानुमानतः प्रामाण्ये मेयपक्षः विशेषणत्वेपि योग्यत्वाद्यजन्यत्वस्य प्रोक्तप्रत्यासत्तिजन्यपरोक्षा
न्यतरत्वमित्यर्थः कल्पनतानित्यरूपेण ह प्रामाण्यमात्रे निपक्षतावच्छेदकत्वे देवं यतः सिद्धसाधनं दोषदत्ति किमर्थं पक्षसंकोचो वा विशे
षणं चेति भावः । एतज्ज्ञानग्राहकेति अत्रापि ग्राहकविशेषणोपादाने पक्षसंकोचे चपर्वे वृत्त्याछेद्यमित्यवगंतव्यं विशिष्टेति अगृहीतासंस
र्गधर्मधर्मिगोचरैकज्ञानत्वमित्यर्थः अतएव नाग्रिम लाघवासंनवोन च विशेषणज्ञानं विनेत्यग्रिमदूषणमसंभवकमित्यर्थः । नापि प्रमाह
तितिनवज्ञानतावच्छेदकस्य च यमसंभवतीतौ वक्ष्यमाणमपि प्रामाण्यं कथं तन्मते ग्रहीतव्यं न च घटत्वविशिष्टं घटत्वप्रकारकधी विशेष्यः
घटत्वप्रकारकज्ञानतान्याश्रयत्वादिति पक्षधर्मतावलाद्विशिष्टसिद्धिः ननु विशिष्टमनुमेयं येन विशिष्टाहितज्ञानता विशेषज्ञानं प्राक्नि
कल्पकेति वाच्यं एवं स्वतः प्रामाण्यग्रहे अप्रामाण्यस्यापि स्वतो ग्रहप्रसंगात् । अघटोयं तथा तथात्व ज्ञानतावत्वादिलानुमानं दो
नामिवपि समं पपवसितेवादेन एवं घटत्वप्रकारकज्ञानविशेष्यत्वानुमानं न वा तदुक्तविशेषोपपन्नमते
त्वमापकं लिंगान्तरं तन्मते तु मे वा लिंगं अपि च ज्ञानातींद्रियत्वसाध्यसिद्धिर्ज्ञानांतरसंस्कारकारैर्वाद्या

[illegible] थात्वस्य प्रकारकज्ञानमेव न तु तः स्मृत्यानुमीयमानज्ञानं विशिष्टस्य स्मरणे [illegible] लिंग[illegible] यमेतज्ज्ञानं वगमः घटत्व
[illegible] घटत्वप्रकारतावगाहनतावत्त्वस्य तल्लिंगस्य यह संनपादिति सिद्धवाकुः। न प्रथमं प्रथमाहितज्ञान [illegible] विशेषो नियमतात्तरा कथ
[illegible] नीयसंस्कारस्य विशिष्टस्मारकत्वे मानाभावात् विशिष्टज्ञानोपाधीनतस्या वक्ष्यमाणत्वात् किंतु ज्ञानतामात्रं तज्जन्य [illegible] मिति ताक
विवक्षामात्र्यं विषय इति सत्त्वं तथाहि घटमहं जानामीति ज्ञानज्ञानाकार इति सर्वजनसिद्धं स्वप्रधानतयान्यथा वेति प्रकारे विवादो नाकारे
तदाकारधीविषयः प्रामाण्ये न वेत्यत्र तु विवादः तत्र चाहं ज्ञानवानज्ञानतावत्त्वादिति वा। घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञा
नतावत्त्वादिति वा ज्ञायमानानुमितिर्ज्ञानविषयीनत्वं ज्ञानस्य विषयमप्यवगाहमाना धर्मधर्मिवत्तत्र न यद्वैशिष्ट्यमपि विषयीकुर्वन्ते
ज्ञानविषयत्वादिविशेषान्न इदमात्मव्यवसायरूपेत्यादि न च घटत्वप्रकारकत्वे घटत्ववैशिष्ट्यावगाहि विषयकत्वे ज्ञानस्यानुमित्याविषयी
कृते किमन्यदवशिष्यते प्रामाण्ये ज्ञातमिति प्रामाण्याशयः। न च प्रत्यक्षेणैव ज्ञानयद्विषयविशिष्ट [illegible] तेनिवार्यं तन्मते तदनभ्युपगमे [illegible] ज्ञान
न तस्याज्ञानविषयकानुमितेरेव तथात्वनियमात् स्वप्रहृति वर्तमानज्ञानग्रह एवं तद्धर्मतत्तथानियम [illegible] न चानुमितेर्थापकतावच्छेदकप्र

कारकतानियमापत्तेरितिवाच्यं। ईश्वरानुमानेज्ञाननित्यत्ववदनथाभूतस्यापितद्विषयत्वात्तद्विषयेनविनानन्वासत्तेनहीहेतोस्तद्धेम
नियमात्तस्यैनएवमुक्तरूपणामशंकयापिव्यक्तिःशाब्दज्ञानेनासत्तेअन्यथाश्रयाकमपिज्ञानप्रत्यासत्त्यादिकमशंवचकल्पनंस्यात्तनवज्ञानना
वत्वेसमवायेनास्तित्वंज्ञानकत्वयाव्यभिचारीतिवाच्यंतदीयतानियामकस्यसंबंधांतरस्यैवाभ्युपगमात्अन्यथानियतायिकारणकत्वा
नासिद्धिप्रसंगादितिलक्षणेनेतिदिक्प्रामाण्यंचक्षुतेहिवारणीयमितिदोषःनन्विश्वयादेवेतितच्छेष्यकत्वादिनिश्चयादेवेत्यर्थःविशे
ष्यइतियद्यपिगुरुमतेनवैशिष्ट्यविषयकत्वंप्रामाण्यंतथाप्यस्मदभिमतमपिप्रामाण्यंस्तुयहमेवेत्यभिसंधायैतदभिधानमित्यवसेय
स्ततत्वंधर्मिधर्मितावाह्मकवैशिष्ट्य तन्मतविशिष्टज्ञानविषयइत्युक्तंविप्रतिपत्तौतन्मतेपियथार्थत्वंप्रामाण्यंयथास्तुग्रहंतथायेवस्य
तेनचतन्मतेज्ञानत्वमेवतत्तत्स्थलकोणत्वेप्यस्वरूपत्वात्तेनेयव्यवहाराभ्योपकत्वात्विषयनिरूप्यमितिविषयानिरूप्यज्ञानादि
विषयइत्यर्थःव्यवसायेतिव्यवसायविषयतायानियामिकायास्तत्त्वात्वादित्यर्थःननुविषयनिरूप्यत्वेनैनलब्धावहितमवनिरूप्यमित्य
नवस्थितेनयावद्वैशिष्ट्यविषयकतावच्छेदकत्वेमानाभावःव्यवसायेत्यादेस्तत्रैवानैकांत्यादित्यत्रकृत्वानिर्णायकत्वं[illegible]नतु

प्र·प
२२

विकल्पकात्तत्संबंधानवगमे तद्विशिष्टधीनिरूप्यत्वे यस्य निरूप्यते तन्नहि तद्वैशिष्ट्यमिति [illegible] तन्महत्वं
दिवयवउपस्थितेर्यथा यथं कस्यचित्कथंचित् अतमाशंकितमिति न। नानाग्रिमग्रंथविरोधः प्रामाण्यस्य [illegible] नावृत्तिविशिष्ट [illegible] वनवद्य
नियमाद्दितिभावः अभावेति नह्यभावे अभावत्वप्रतियोगिनिवाप्रतियोगित्वमवगम्य तद्विशिष्टधीः [illegible] नारोपयोर्विवक्षितत्वं तद्वत्
यधीरित्यर्थः नत्विदमयुक्तं तथाहि प्रतियोगित्वेन तत्स्वरूपरूपेणासत्तां अभावत्वेनउक्त [illegible] भावस्वरूपं पूर्वमनुपस्थितं कथं भास
तेऽभ्युपगमाद्यज्ञानेन तत्प्रतीतेरित्यत आह बोधेति निर्विकल्पकमेव प्रथमं यदा त्वभावत्वं स्मर्यते तदा तद्विशिष्टधीरिति चेत्तर्हि एवं प्रतियोगि [illegible]
भावत्वस्याप्यभावस्वरूपतया पूर्वं ज्ञातस्य ज्ञानसंभवात् नह्यभावबुद्ध्याबुद्धाभावत्वविषयत्व [illegible] स्याविनाशकोपाधिरूपा [illegible]
र·नत्वभावधीविषयाभावत्वरूपत्वं अन्यथा तत्राप्यभावत्वं स्यात्तस्यैव बोधात्तथाप्रतीतावनवस्थापत्तेः नच स्मरणं गति [illegible] नत्वभावत्व
संभवात्तन वजन्मोन रानुस्मरणात्तिस्तारः घटाभावे तदभावत्वस्मरणापत्त्या घटाभावादभावप्यभावत्वस्योक्तस्य स्मरणे एवं तत्राप्युक्ता [illegible]
भावत्वविशेषणं न तिष्ठस्यापि तत्स्य स्मरणे तस्य विषयनिष्ठाभावेन विषयानवस्थाप्रसंगात् नचाभावरूपस्यैवाभावत्वात्मकत्वेघ

कथं संशयाभावयोस्तद्बुद्ध्यनुदयापत्तिः तयोः स्वातन्त्र्यादिति वाच्यं प्रागभावत्वादिना तथात्वेऽप्यभावत्वेन तयोः स्वहेतुत्वात् अन्यथा घटाद्यत्तान्ताव
धीरपि तत्र न स्यात् अन्यस्य तस्याभावादिति दिक् । ननु एवमनारोपे नैव प्रवृत्तिर्बाधादित्युक्तं संकरापादनस्य तत्त्वहेत्वापादनरूपतया जनकज्ञाने विघट-
ने तादृशं न बाधादित्यत आह उपनायकेति तद्विषयत्वमात्रग्रहेऽपि तद्विशेष्यकत्वोपनायकाभावादित्यर्थः तथा च बाधेन स्वातन्त्र्येण तद्विशिष्टधीरेव प्रति-
बध्यते विषयत इति जनकधीविघटनमेवेति भावः । ननु बाधनिश्चये तु नाशादेव नोपनय इत्यर्थः श्वैत्यादौ मित्यनंतरं भ्रांतिप्रामाण्यग्रहापत्त्या संकरा-
पत्तेर्द्वीरत्वादिति शङ्खगंधवदिति इदं तु लौकिकयोग्यत्वे वक्तव्ये ज्ञानान्तरोपनीतस्य मनसा स्वातन्त्र्येण ग्रहे शंकैव नोदेति मनसो बहिरस्वतंत्रत्वादि-
लव्यभिचारग्रहेण फलवति तद्विरहोपस्थितेरावश्यकत्वादित्यत्र ब्रूमः न तावत्सर्वत्र कार्यमेव मानं किं मानं क्वचित्सत्यत्वं क्वचित्सामर्थ्यं
क्वचित्कार्यं क्वचिदन्यत् इत्यस्य यथायथमनुपगमादुपन्यासान् इष्टं तथापि द्वितीयमस्त्वेव न च तद्दूषितं प्रत्यक्ष आपाततो दोषानुद्धा
रेपि मा ह्वात्तु मित्यादिस्थले तदभावात् न च योग्यताविशिष्टज्ञानादिहेतुत्वमावश्यकमपि दोषस्तु क्व एवेति वाच्यं तदसंसर्गाग्रहस्यैव तत्तेतो
रिति न्यायेन हेतुत्वसंभवात् उक्तानुपपत्तेरुभयपक्षसाम्यात् अथ योग्यताविशिष्टधीत्वं हेतुर्न तु तदसंसर्गाग्रहो गौरवात् न च वैशि
ष्ट्यविषयत्वेन तत्सहकारिदंडकारणतायां ज्ञानेनेतरं दृष्टत्ववदवच्छेदकत्वसंभवात् च क्वसाहित्यादाववच्छेदकत्वे बाधकं वक्ष्यते न तु वैशि
ष्ट्यविषयकत्वे तदस्ति यत्र ज्ञाने तद्विषयत्वं तत्र तद्विषयत्वस्य कदाप्यसंभवात् न चावच्छेद्यावच्छेदकभावे कृतं उभयत्र न वैपरीत्यं
कारणमात्रोच्छेदप्रसंगात् यदि चावच्छेदककुलालत्वादेराश्रयद्वारके कारणांतरसंबंधेन तदाश्रयस्य कुलालादेः साक्षात्संबंधे ला
घवात्कारणांतरसहकृतः कुलालादिरेव हेतुर्न तु तदवच्छेदक इति नाभ्युपेतहेतुमात्रोच्छेदः तदा दृष्टदंडवैशिष्ट्यविषयकज्ञान

प यौरपितुल्यं किंचैतावतावैशिष्ट्यविषयकत्वमवच्छेदकं हेतुर्वोक्तनदसंसर्गाग्रहस्तत्र शंकितोदितगौरवात् अन्यथा दण्डत्वाभावेचक्र
२७॥ सङ्गविफलाभावेचक्राभावादेहेतुत्वापत्तेः नैदर्थ्येफलाभावेन नैदर्थ्याभाववत्त्वं किंवासंसर्गाग्रहेणासंसर्गाग्रहविरहमात्रं किंतु उपनिवं
धकमाचाभावस्तथा च ताद्दशाभावानां हेतुत्वापेक्षयाल्पत्वेहेतावच्छेदकान्तरकल्पनैव लघीयसी न च पूर्ववैपरीत्यमुपजीव्यविरोधाद्योग्य
तास्नानत्वादीनां पूर्वत्वसामावच्छेदकानामपरित्यागादाधिकमितिन्यायादिति चेन्नहि तावत्यामुक्तया रज्जनविशिष्टज्ञानेपि विशिष्टज्ञानत्वेनैव प्र
वृत्तिहेतुत्वमितिसिद्धान्तमिथ्याधीः तदयं निर्गलितार्थः यदि विशिष्टज्ञानत्वकल्पने लाघवं शाब्दज्ञाने तदा प्रवृत्तिवलादेवापरथा सामग्रीवलादेवा
न्यथाख्यातिरित्तुनयतः पाशारज्जुः नन्वसन्नप्रथमे नियमनस्तत्कारणताग्रहः सत्यप्रवृत्तौ योग्यतादिस्थले तु नयत्र विशिष्टधीस्तत्र न फ
लमित्यपि वक्तुं शक्यत इति वैषम्यमिति चेत् न प्रामाण्यग्रहानुरोधादिनापूर्वत्वनियमात्माभावस्तु पूर्वत्वनियमस्तथापि तत्रगृहीत
मप्यन्यथालाघवात् प्रवर्तादिरणवैपरीत्यकल्पनात्यन्यते कार्यशक्तिवत्त्वविसंवादिस्थले वैशिष्ट्यविषयत्वं ज्ञानविशिवेद्यमेव न चोक्तपीन राम
रुक्तादि अनुश्यतेहि वैशिष्ट्यविषयत्वमित्यविवादं परैरस्मद्बाधकादसंसर्गाग्रहरूपत्वात्ख्यप्रमाण्णादिप्रतिपत्त्यानपंमाणत्वेनोपन्यासा

दं तच्च बाधकं तद्धेतोरेवेत्यादि लाघवमनतस्तदनावरूपमेव विपरीतं लाघवमुपन्यस्तं तेनात्र लाघवं निर्दिष्टम् एवं प्रधानस्तत्र प्रत्यक्षोपन्या
स इति तत्प्रत्यक्षत्वं ग्रंथस्तदिदमां प्रतिवंदितद्वारेण यथान्यथाख्यातिसिद्धिं चातिस्फुटत्वादुपेक्ष्य प्रकृतलाघवरूपः सचोक्तः प्रतिबंदिनये नोनय
संमतिमादर्शयतिस्म अत एव नेदायहे सिद्धवज्जैरवमाहेति· वस्तुतो अगृहीतासंसर्गधर्मधर्मिगोचरैकधीरेव तद्दर्शने विशिष्टधीरतएव
सत्यस्थले सार्थवशासंपन्नेति न वाभ्युपगमः अन्यथाग्रहे तेरन्यथोपपत्तेर्विशिष्टधीः सत्यस्थलेपिदुर्लभा स्यात् तदिहापि प्रत्यक्षोक्तयथा तथाप्य
त्राशंका नासादिदं रजतमित्यगृहीतासंसर्गिगोचरैकैवस्त्विति रूपधीः स्तत्र सा कथं नान्यथाख्यातिः नह्यतत्त्वं पर्यंतमन्यथाख्यातेः स्वरूप
माच्छमहे न वास्मृत्योरयुगपद्भावनियमः अनन्वितान्वयपदे नियमादन्वितान्वयपदेपि प्रथमं संनवाच्च चरमं नियमादेवेति दिक् बाधका
भावरूपहेत्वभावमाह नवेति हित्वादीति· तस्य तन्मते अपेक्षाबुद्धिव्यंग्यत्वात् तस्याश्च समूहालंबनरूपत्वादित्यर्थः इंद्रियेति न तु प्रत्यक्षत्वापि
वैजात्यं दोषस्य वा संवादिप्रवृत्तिप्रतिवंधकत्वं कल्पनीयमेवं प्रथमे अनंतु न वा तरद्वितीये असंभवात् ज्ञानकज्ञानाविघटकस्य द्रष्टव्य प्रति
वंधकत्वादिति स्मृत्याभासादितिस्मरणद्वयस्य युगपदनवस्थानादुक्तप्रकारस्यापि न च बाधेनानन्यगतिकत्वात्समूहालंबनरूपैव प्रवृत्तिरिति

प्र·प यद्यप्यनेनैवान्यथाख्यातिरायाति तथापि हयोर्धर्मिणोश्च निरंतरस्मृतिसंभवेनान्यथाख्यात्यसंभवेनोक्तातिप्रसंगनिवारणादित्यव
॥६८॥ धेयं आकांक्षायाः शुक्तयंशधर्मातिरिक्ताया मानाभावाद् चेतनरजतधर्मादौ तदसंभवादित्याद् उत्कटेति अथरंगेत्यादि कार्यानपेक्षत्वादित्यंतं
शंकाविसंवादिनीतत्र ननवनीत्येतदंतं ताराशंकासाधुसमर्थितं गुरुमतमिति नन्विह प्रथमग्रहादपरित्यागे कार्यं शक्तिरपि न परित्याज्येति
साधुन्यायमतं समर्थितमिति नेनापि स्ववचमिति चेत् न गौरवात् इष्टभिन्नविषयकज्ञानहेतुतायां नरभेदग्रहाभावकारणतायां
गौरवादिति वैषम्यादिति ननु विसंवादिस्थले भेदाग्रहहेतुतावच्छेदकत्ववद् विसंवादिस्थले विशिष्टज्ञानस्य हेतुत्वं ब्रुवतां इष्टज्ञाना
भिन्नप्रवृत्तिविषयज्ञानहेतुतस्य वाच्यतया अभेदपरिचायकतया इष्टज्ञानमवच्छेदकमेव वाच्यं तथा च तत्रापि तज्ञोचरव्यवहाराजन
कतया तस्य तद्विषयतयाज्ञानहृयापत्तिः त्वन्मते विशिष्टज्ञानस्यैकज्ञानत्वादेकत्वस्य चाभेदरूपत्वादित्यत आह अविसंवादीति तत्रेष्ट
ज्ञानभेदाग्रहयोर्भेदेनावच्छेद्यावच्छेदकभावो न विरुध्यते इह च विशिष्टज्ञाने तयोरभेदेनावच्छेद्यावच्छेदकत्वाभावादिति नहीति भेदा ग्रह
ग्रहत्वेनैवान्यथादिग्रहसंभवादिति भावः नापीति भेदाग्रहमग्रहीत्वापि विशिष्टज्ञानान्यथादिग्रहसंभवात् अन्यथापि तथात्वाभ्युपगमे

सहकारिमात्रोच्छेदापत्तिरिति भावः ननु तत्र विनिगमनाविरह इत्यत आह अन्यथेति अत्रापि विनिगमनाविरहाद्द्वयोरपि हेतुत्वमिति
भावः ननु भेदाग्रहत्वेन यद्यन्वयव्यतिरेकग्रहस्तदा स्वातंत्र्यं तत्र न इष्टभेदाग्रहमात्रस्याप्रतिबंधकत्वात् प्रकारांतरोपस्थितेर्जनने भेदाग्रहे सत्यपि
प्रवृत्तेः किंचिदिष्टतावच्छेदकप्रकारेणोपस्थितस्य भेदाग्रहः प्रतिबंधक इति तदभावत्वेन हेतुत्वं वाच्यं तथा चोपस्थितत्वं तत्र विनान्वयादिग्रहं उपस्थि
तिरवच्छेदिके वेत्यरुचेराह किंचेति यदि भेदाग्रहस्य हेतुता तदैव परमुपस्थितिरवच्छेदिका तदैव तु न संवादिस्थले ग्रहलाघवेन प्रवृत्ति
तावच्छेदकेनेष्टविशिष्टज्ञानहेतुत्वनिश्चयादिति भावः इष्टज्ञानस्य इष्टविशिष्टज्ञानस्य अत एवेति विशिष्टकार्यकारणभावाभावेन साध्याव्या
पकत्वादित्यर्थः ननु न तत्रेदं ज्ञानमात्रात्प्रवृत्तिप्रसंगः उक्तभेदाग्रहविलंबेन तत्र फलविलंबादित्यत आह नहीति संवादिप्रवृत्तावप्युक्तभे
दाग्रहहेतुत्वे प्रागुक्तविपरीतचतुष्टये युगपत्प्रवृत्तिनिवृत्त्यापत्तेरिति भावः ननु ज्ञानानां यथार्थत्वपक्षे निष्कंपप्रवृत्तिरेव न लब्धं कथं न स्यादिति
निष्कंपप्रवृत्त्यन्यथानुपपत्तिरेव विपक्षबाधिकेत्यत आह ज्ञानेति प्रवृत्त्यन्यथानुपपत्तेरभावादिति भावः ननु प्रत्यासत्त्यंतरप्रतिबंधेपि न सा
मान्यप्रत्यासत्तेर्नस्याः सर्वोपसंहारकत्वेन सिद्धेरित्यरुचेराह किंचेति तथा च प्रत्यक्षेण सामान्यप्रकारेण धर्मिणो ग्राहकमाने न यत्र यत्किं

प्र॰प चिद्व्यक्तिमात्रं गृहीतं तत्र तज्ज्ञातान्तरस्मरणाभावादिति भावः ननु व्यक्तिमात्रगोचरप्रत्यक्षजनितस्तावन्मात्रगोचरसंस्कार इति तेनैव सामान्यप्रत्या-
॥६९॥ सत्त्या सकलस्मरणं जन्यतामित्यत आह नन्विति अकारणत्वादिति यद्यपि कारणस्यापि प्रत्यासत्तौ कारणत्वमेव अप्रमाणं संबन्धस्य जनकत्वेनेति
प्रसंगात् न च स्वजनकसंबंधतयैव प्रत्यासत्त्वं तज्ज्ञानपेक्षा कारणत्वे व्यस्य न्यायस्य तुल्यत्वादित्यकारणत्वोपन्यासोऽनासक्त्यावत्किंचित्कर एवेति
स्वजनकप्रत्यासत्तासंबंधत्वादित्युचितं न च स्वजनकप्रत्यासन्निवेशे विषयिणां ज्ञानादीनां कारणस्य तु प्रत्यासत्त्वेन रूपमपि संभवतीत्यकारणत्वं प्रत्या-
सत्त्वं तदाभावे हेतुरुक्त इति वाच्यं करणीभूतस्यापि ज्ञानादेः प्रत्यासत्त्वं तदाभावेऽपि स्वजनकमात्रप्रत्यासन्नत्वादित्यस्यैव वक्तुमुचितत्वात् न च
करणत्वादित्यस्य न च करणं सव्यापारमिति तस्य व्यापारतया प्रत्यासत्त्वं तदापेक्षापि संभवतीत्यकारणत्वं प्रत्यासत्त्वं तदाभावे हेतुरुक्त इति वा-
च्यं सामान्यस्य नित्यत्वेनाव्यापारत्वात् यत्र च तत्प्रत्यासत्तिस्तत्र तदाश्रयसंयोगस्य तदाश्रयस्य तज्ज्ञानस्य व्यापारत्वात् इंद्रियसंयुक्तधूमभूम-
त्वेन सामान्येन ज्ञाने धूमसंयोगस्य शब्दप्रत्यक्षस्थले शब्दस्य शब्दोपनीतमानसव्याप्तिज्ञानादौ ज्ञानस्य व्यापारत्वात् तथाप्यकारणत्वात् प्रत्यक्षा- राम
कारणत्वादित्यर्थः तथा च सामान्यप्रत्यासत्तिः प्रत्यक्षस्य कारणस्य संस्कारस्तेन तथा न जन्यज्ञानस्य प्रत्यक्षतापत्तेरित्यत्र तात्पर्यं भेदाग्रहस्यापि

तद्धेतुत्वादिति नचोपनीतप्रत्यक्षज्ञाने पूर्वं तज्ज्ञततया ज्ञानं सामग्रीउपनीतप्रमासिद्धिदशायामुपनीतप्रमात्वेन तत्सामग्र्यकल्पनात् न चात्रमस्थ
लेसामग्रीतथेति नन्वमविशिष्टज्ञानसामग्रीविशेषसामग्र्यभावेसामान्यसामग्र्यभावात् अतएव यत्र चंदने पूर्वं सौरभेनोपलब्धं तत्राप्युज्ञानस्वी
कार इति वक्तव्यं एतद्धर्मावच्छेदेन यद्धर्मग्रहस्तद्धर्मवत्त्वग्रहस्यैव तदुपनीतज्ञानसामग्रीत्वात् अस्ति च चाकचिक्यविशेषावच्छेदेन गृहीतं रज
तत्वं तदवच्छेदेन शुक्तिग्रहस्य अतएव साहस्यज्ञानेऽभेदहेतुरित्युच्यते अतएव चंदनांतरेपि सौरभोपनयो यत्र चंदनत्वावच्छेदेन सौरभोपलं
भः । चक्षुज्ञातस्तातदादरोपसंसर्गाग्रहार्थेव तस्मिन्सति तद्विलंबेनं मानाभावात् अवच्छेदकांतरेणग्रहे भेदग्रहसंभवेन तद्धर्मावच्छेदेन ग्रहे
भेदाग्रहात्सचात्र दोष एवेति किमनेनेति तात्पर्यं पुरोवर्तीति पुरोवर्त्यंशो भेदांशो चेत्यर्थः इंद्रियेति इंद्रियत्वेनेंद्रियजन्यत्वादित्यर्थ
: न च संस्कारजन्यत्वात्स्मृतित्वमेवोजयत्वेति वाच्यं अनुव्यवसायानुरोधेन तज्जन्यस्य स्मृतित्वप्रमाणांतरासहकृतसंस्कारजन्यत्वस्य प्र
योजकस्य वाच्यत्वादिति भावः तद्विशिष्टेति विशिष्टज्ञानसामान्ये विशेषणसन्निकर्षत्वेन हेतुत्वं नत्वनजातिरिति विशेषणज्ञानसामग्री
त्वं वाच्यं तथा च विशेषणज्ञानसामग्रीत्वेन तत्र संयुक्तसमवायस्य हेतुत्वं संयुक्तसमवायत्वेनान्यथासिद्धमित्यर्थः नहीति सामान्यसाम

प्र·प ॥७०॥ श्रीमाज्ञात्फलाभावो विशेषणसामग्रीकल्पकौ न चेदसदित्यर्थः ननु विशेषणज्ञानसामग्रीत्वमपि संयुक्तसमवायत्वाद्यवच्छेदेन ग्राह्यमित्युप
जीव्यत्वात् नैव रजतत्वविशिष्टप्रत्यक्षमित्यरुचेराह किं चेति विशेषणज्ञानमात्रस्यैव हेतुत्वात् संयुक्तसमवायादीनां तद्विशेष्यकप्रत्यक्षहेतु
त्वादिति भावः ननूक्तसामान्यसामग्र्यां सत्यामपि घटविशिष्टज्ञानकाले कुतो न रजतविशिष्टज्ञानमिति तत्र रजतसंयोगरूपां विशेषसा
मग्र्यावश्यकीत्यत आह रजतेति न च रजतसंयोगस्य विशेषसामग्रीत्वेपि न तत्वेन सामग्रीत्वमपि तु रजतविशिष्टज्ञानविशेष्यसन्निकर्षत्वे
न न रजतसंयोगत्वेनेत्यर्थः [illegible]दिति विशिष्टज्ञानसामान्ये विशेष्यसन्निकर्षसामान्यं हेतुरिति रजतविशिष्टज्ञानरूपे विशेषे तद्विशेष्यस
न्निकर्षरूपस्य विशेषस्य प्रयोजकत्वं न तु रजतसंयोगस्य रजतस्य तद्विशेष्यत्वाभावेन तत्संयोगस्य विशेष्यसन्निकर्षविशेषत्वाभावात्
न हि व्यभिचारेपि सामान्यविशेषभावः संयोगस्य विशिष्टज्ञानसामान्यं प्रति विशेष्यज्ञानसामग्रीत्वेन जनकतया संयोगत्वेनान्यथासिद्ध
त्वाद्विशेषसामग्र्यन्तराकल्पनमित्यर्थः न च द्रव्यप्रत्यक्षे संयोगरूपा विशेषसामग्र्यावश्यकीति कथं रजतरूपद्रव्यप्रत्यक्षं तां विनेति वाच्यं राम
द्रव्यविशेष्यकप्रत्यक्षे द्रव्यसंयोगस्य तथात्वात् न चेह रजतं द्रव्यं विशेष्यमिति भावः विशेष्येति विशेष्यशुक्तिसंयोगादेवेत्यर्थः ननु रजतसा

क्षात्कारे रजतसंयोगत्वेन हेतुत्वं न तु रजतज्ञानविशेष्यसन्निकर्षत्वेन हेतुत्वं गौरवात् एवं चक्षुर्व्यविषयकप्रत्यक्षे तद्द्रव्यसंयोगो हेतुर्न तु द्रव्य
विशेष्यकप्रत्यक्षे इत्यरुचेराह अपि चेति । एवं सति हेतुत्वाभावादन्यथाख्यातिबाधेनाह अन्येदाग्रहस्य प्रवर्त्तकत्वं स्यादिति तद्द्वयेन वरं विशेष्यसन्नि
कर्षत्वेन द्रव्यविशेष्यकप्रत्यक्षत्वेनैव हेतुहेतुमद्भावः कल्प्यतामित्यर्थः । विशेष्यसन्निकर्षत्वेनेत्युपलक्षणं संयोगस्य द्रव्यविशेष्यकप्रत्यक्षं प्रति
हेतुत्वस्य लघुत्वादित्यपि द्रष्टव्यं नन्वेवं फलमुखं गौरवं दोषः इत्यागतमित्यरुचेराह वस्तुतस्त्विति ननु तदेव नोपपन्नमसिद्धेः । परमते दोषस्य विसंवा
दिप्रवृत्तिजनकत्वात् अत एव तज्जनकत्वमयथार्थत्वं परमतेऽस्त्वत्यत इत्यस्वरसादाह अपि चेति दुष्टादिति दुष्टमिन्द्रियं न विजातीयकार्यज
नकं दुष्टत्वाद् दुष्टबीजवदिति नानुमानमिति भावः । न तु कारणबाधेनासंसर्गाग्रहरूपतया व्यवसायोऽन्यथासिद्धः स्यात्स चेन्नास्ति तदानुव्यव
सायएवात्र मानमित्याह एव[illegible]मिति । वि[illegible]रेति अन्यस्यान्यथाज्ञानेन जवतीत्येवमाकारोऽन्यथाख्यातिबाधरूपो संसर्गग्रहस्तद्वाचक इत्यर्थः । शुक्ति
कर्मकेति न चेदं रजतमिदं त्वेतदुत्तरं रजतवदहमित्यन्वयया विशेषणविशेष्ययोरसंसर्गाग्रहाद्विशिष्टवैशिष्ट्यव्यवहारस्तथा रजतत्वप्रकार
केशुक्तिविशेष्यकत्वासंसर्गाग्रहात्प्रवृत्ता व्यवसाय इति वाच्यं रजतत्वप्रकारकत्वस्य केवलस्य तत्प्रकारिणो ज्ञाने ज्ञानप्रसंगेन रज

त्वमेप

प्र·प तत्प्रकारिमानावश्यकतया विशेषदर्शने बाधात् तत्र शुक्तिविशेष्यकत्वासंसर्गाग्रहासंभवात् न हि रजतत्वासंसर्गाग्रहस्तज्ज्ञानेपि संभवति
॥७१॥ न वा तत्तामोषवद्रजतप्रकारिमोषः प्रकृते न तु ऽज्ञाने रजतज्ञानवद्रजतप्रकारकज्ञाने रजतप्रकारज्ञानात् शुक्तिप्रकारिज्ञाने रजतत्वप्रका
रज्ञाने तु सिद्धेः नः समीहितमिति भावः अन्यथेति द्वितीये बाधोनुत्पत्तिलक्षणोऽप्रामाण्यज्ञप्तिलक्षणश्च न तत्र प्रथमः प्रथमेनैव द्वितीये द्विती
येनैव विरोधिनि ज्ञानरूपे विशेषदर्शनं विना द्वितीयस्यानुत्पन्नतया तज्जन्यत्वनियमेन तस्य दुर्लभप्रामाण्यबोधकत्वादित्याखंडलार्थः प्रांच
स्त्विति असद्विषयत्वं भ्रमत्वेन तेनैव अनुव्यवसायस्यापि भ्रमत्वापत्तेरित्युक्तावाथ प्रामाण्ये व्यधिकरणप्रकारकत्वं तत्र मिति सद्सद्विषयतायां
विवादः सोपि तथाविशिष्टस्यासन्मते अनतिरेकेण प्रथमस्यैव समीचीनत्वात् प्रांचस्तद्विषयतावच्छेदकं न प्रत्येकमित्यसद्विषयता माकु
:॥ ॥ वस्तुरिति चक्षुः प्रयोज्यज्ञानत्वावांतरजातिविशेषस्य साक्षात्त्वयोजकत्वादित्यर्थः ज्ञानेति तत्रानुगतव्यक्तिविशेषस्य वंज
कत्वादिति भावः निर्विकल्पकेति तादृशज्ञानस्यानुमित्यादिसामग्र्यजन्यतया विशिष्टप्रत्यक्षस्यापि निर्विकल्पकत्वेनैव तद्वैजात्य राम
सिद्ध्या साक्षात्त्वस्य धर्मिग्राहकसिद्धत्वादित्यर्थः यद्यपि धर्मिसिद्धमनंतरं पारिशेष्यादेवं तथापि धर्मिग्राहको मानोपजीवकतया तदे

वयमिथाहकनयोक्तमिति नाव: योगजेति अत्र योगिप्रत्यक्षवारणाय आद्यं ज्ञानलक्षणप्रत्यासत्तिजन्यतद्वारणाय द्वितीयं सामान्यप्रत्या-
सत्तिजन्यतद्वारणाय तृतीयं ईश्वरप्रत्यक्षवारणाय चतुर्थं अनुमितिवारणाय पंचमं विशेषणमित्यस्तु· सविकल्पकाजन्यत्वं तु कुत:
ज्ञानाजन्यत्वेन तद्वारणात् न च प्रतियोग्यादिसविकल्पकजन्यत्वादभावादिप्रत्यक्षस्य तत्राव्याप्तिवारणार्थं स्वविषयकेति सविकल्पक-
विशेषणे दत्तेपि धारावाहिकाव्याप्ति नयेन स्वविषयकसविकल्पकत्वेनाजन्यत्वं विवक्षणीयं तेन सविकल्पकपदमप्रसिद्धिवारकं स्व-
विषयकज्ञानत्वेन जनकत्वाप्रसिद्धे: स्वविषयकसविकल्पकत्वेन तु जनकत्वं स्मृतावेव प्रसिद्धमिति वाच्यं तथा सति जन्यपदवैयर्थ्या-
त् नहि स्वविषयकसविकल्पकत्वेनेश्वरज्ञानमपि हेतुर्येन तदर्थवत् न च स्वविषयत्वं स्वविषयविषयकत्वेन व्यपदेशोपि समासाद-
न्यथा सौरभप्रत्यक्षविषयकसविकल्पकाजन्यतया सौरभप्रत्यक्षोपनीतप्रत्यक्षातिव्याप्तिप्रसंगात् तथा चात्मज्ञानस्योपादानं स्मृत-
स्वविषयात्मगोचरनगवत्यत्वदजन्यतया तत्राव्याप्तिवारणाय जन्यपदं सविकल्पकविशेषणमिति वाच्यं तस्य स्वविषयविषयक-
सविकल्पकत्वेपुपादानप्रत्यक्षत्वेन जनकतया यथोक्तविवक्षयैवानतिप्रसंगादिति अत्र केचित् जन्यसविकल्पकमेव प्रत्यास-

प्र.प
।।७२।।

त्तिर्नवतीति तद्व्यावर्त्तं पदाभ्यां ज्ञानप्रत्यासत्तिजन्यत्वं विवक्षितमिति वस्तुतस्तु प्रत्यासत्तितावच्छेदकं जन्यसविकल्पकत्वं निर्विक-
ल्पकेश्वरप्रत्यक्षाभ्यां स्वगोचरज्ञानाजननात् तस्य स्वरूपयोग्यत्वे कदापि फलोपधानापत्तेः तथा च ज्ञानप्रत्यासत्तिजन्यत्वमेव विशेष-
णमप्रसिद्धं ज्ञानत्वस्य प्रत्यासत्तिज्ञानावच्छेदकत्वात् अतो जन्यसविकल्पकाजन्येति विशेषणं सम्यक् एवं च जन्यपदप्रसिद्धि [illegible]कं सवि-
कल्पकत्वेन जनकत्वस्याप्रसिद्ध्या अजातावप्रसिद्धे जन्यसविकल्पकत्वेन जनकत्वं प्रसिद्धं तस्य प्रत्यासत्तितावच्छेदकत्वात् स्वगोचर-
ज्ञानजनकतावच्छेदकस्यैव तथात्वात् तत एव स्वविषयकेति सार्थकं। जन्यप्रतियोगि सविकल्पकत्वेन तज्जन्यत्वात् तदनाव प्रत्यक्ष-
स्य विशेषणे दत्ते तज्जन्यस्वविषयकसविकल्पके न जन्यस्वविषयकसविकल्पकं तथा च ज्ञा नितमित्यर्थो लभ्यते न वृत्ति चाभाव प्रत्य-
क्षमेवं जन्यतावत्सविकल्पकेनाजन्यं। तस्य जन्यप्रतियोगिसविकल्पकाजन्यत्वात् स्वविषयत्वं तु स्वविषयविषयकत्वमत्र रूपयुक्तेः। न चेदं ड-
त्वादिविशिष्टं तद्वैशिष्ट्यावगाहि धारावाहिकाबुध्यव्याप्तिः। तत्र सविकल्पकत्वेनाजनकत्वात् विशेषणज्ञानतयैव विशिष्टज्ञानं प्रति जन- राम
कत्वमिति सामान्यमात्रस्यैव निर्वाहेः विशेषसामग्र्यंतरकल्पनात्। न च सुखदंडज्ञानेपि तदापत्तिः विशिष्टवैशिष्ट्यं हि विशेषणावच्छि-

नविशेषणविषयत्वं तथा च दंडज्ञानाद् दंडविशिष्टज्ञानमस्तु दंडत्वज्ञानात्तद्विशिष्टधीस्तु कथं विशेषणे विशेषणज्ञानमेव च न च विशिष्टवैशिष्ट्यज्ञानं
अतएवविशिष्टज्ञानत्वात्तद्वैशिष्ट्यज्ञानस्य न इत्येकाविशेषणे विशेषणं इत्यादिका अपरा विशिष्टवैशिष्ट्यज्ञानसामग्रीन तु सामग्रीत्वावच्छेदकं रूपद्वयं
वक्तेनैकावच्छेदकेनदंडत्वसंनवालदंडत्वेनघटहेतुत्वाद्दंडद्वयजन्यैकदंडजन्यद्रव्यसामग्रीभेदेपिसामग्रीत्वावच्छेदकभेदाभावात्नहिविशिष्ट
वैशिष्ट्यज्ञानत्वावच्छेदेनकार्यतानीलघटत्ववदाप्येसमाजमहिम्नैवविशिष्टकार्यनिर्वाहकस्तुरजितंदनमित्यादौचजन्यसौरनसविकल्पकस्य
जन्यसविकल्पकत्वेनजनकत्वात्विशेषणसंनिकर्षस्यापिविशिष्टबुद्धौहेतुत्वेननतोक्तसविकल्पकंविहायप्रत्यासत्त्यन्तराभावात्नचदं
डिप्रत्यक्षस्यापिदंडविकल्पकंप्रत्यासत्तिर्यथाहितद्दंडेपिदंडीतिबुध्यादृत्तिसत्त्वसंयोगस्यैवप्रत्यासत्तित्वात्प्रत्यासत्त्यंतराभावएवज्ञानस्य
प्रत्यासत्तित्वात्स्वायोग्यगोचरज्ञानस्यैवप्रत्यक्षजनकत्वाच्च।बहिरर्थस्मरणेमनसस्तथाकल्पनात् अतएववर्वेदनेस्तुरजीत्वज्ञापितदृशीः प्रत्या
सत्तिः नचात्रसंयुक्तसमवायसत्वेज्ञानंकथंप्रत्यासत्तिर्व्याप्यावेज्ञानस्यतत्वादितिवाच्यं अत्रकल्पेतथाऽकल्पनात्नचलौकिकतापत्तिःउक्त
यजन्यत्वेपिज्ञानप्रत्यासत्तिजन्यत्वात्इष्टतापिस्वविषयप्रदर्शनेनतत्रभावप्रत्यक्षेप्रतियोगिसविकल्पकस्यप्रत्यासत्तितयैवजनकत्वात्नचज्ञा

न तु सामान्यलक्षणाजन्यानुव्यवसायेऽव्याप्तिः स्वविषयकेत्यत्र नेदंगर्भस्य स्वविषयत्वस्य विवक्षितत्वात् । न च सविकल्पकत्वमेव प्रत्यासत्तितावच्छेद
कं ईश्वरज्ञानस्य तत्त्वापत्तेः न च सहकार्यजातावच्छेदकत्वात् नित्यस्य स्वरूपयोग्यस्य तदवश्यंभावात् अन्यथा ज्ञानत्वमेव तथेति किं न ब्रूयादि
ति । वयं तु योगिप्रत्यक्षस्य विजातीयत्वेन तदस्कन्दयथार्कतं यत्र धूमत्वेन सामान्यलक्षणया सर्वे धूमगोचरं धूमत्वगोचरं च संयुक्तसमवायेनैकं
तत्र धूमत्वांशे अव्याप्तिनयेन स्वविषयकसामान्यप्रत्यासत्त्यजन्यत्वं लौकिकप्रत्यक्षत्वं वाच्यं स्वपदं च स्वविषयपरं एवं च मध्यपदलोपे समा
सप्रसंगोऽपि नास्ति न च तदंशे सामान्यप्रत्यासत्तिरजनिकेव ज्ञाने यो विषय एव तेन तस्य सामान्याजन्यत्वात् । तथा च विकल्पकस्य प्रत्या
सत्तितया ज्ञानप्रत्यासत्त्यजन्यत्वमव्याप्तं सुरभि चन्दनमित्यादेः खंड चंदनांशेऽपि ज्ञानप्रत्यासत्तिजन्यत्वादतः स्वविषयज्ञानप्रत्यासत्तिजन्यत्वमलौ
किकप्रत्यक्षत्वमस्तु सुरभि चंदनप्रत्यक्षस्यांशे ज्ञानप्रत्यासत्तिजन्यत्वेऽपि चंदनांशे प्रत्यासत्त्यजन्यत्वात् एवं च दंडिप्रत्यक्षादावव्याप्तिशंकापि ना
स्ति तत्र दंडप्रत्यक्षस्य प्रत्यासत्तित्वात् प्रत्यासत्त्यंतराजाव एव ज्ञानस्य प्रत्यासत्तित्वात् । न च ज्ञानत्वसामान्यज्ञानाजन्यानुव्यवसायाव्याप्ति राम
ः नेदंगर्भविषयत्वाप्रमात् स्वविषयकज्ञानप्रत्यासत्तिमात्राजन्यत्वस्य विवक्षितत्वात् वा । न च न त्वात्मानं जानामीत्यत्र चैकविषयाव

ग१

च्छेदेनैव लौकिकालौकिकत्ववद्द्रव्यादिस्थले ज्ञाने दंडांशे उपनयप्रत्यासत्तिजन्यत्वादुपनयरूपत्वमिति वाच्यं तत्र विशेषणविशेष्यत्वावच्छेदने
देनैकत्रोपनयसमावेशात् प्रकृते च तदभावात् ज्ञानप्रत्यासत्तेः प्रत्यासत्त्यंतराभाव एव ज्ञानजनकतयोपनयप्रत्यासत्त्यजन्यत्वाच्च । नन्वेवं सुरभि
चंदनमित्यत्र सौरभांशे संयुक्तसमवाय एव प्रत्यासत्तिरतो ज्ञानमिदं तदंशे लौकिकं स्यादिति चेत् न तत्र सतोपि संयुक्तसमवायस्याग्राहकत्वा
त्स्वयोग्यगोचरस्यैव तस्य तथात्वात् वक्ष्यति योग्यसंनिकर्षात्ग्रहो न संनिकर्षमात्रात् इति न चेह चक्षुषो योग्यो गंधः तद्विशेष्यकज्ञानाजननात्
तद्विशेष्यकप्रत्यक्षजनकस्यैव तद्योग्यत्वात् न च लाघवेन तद्विषयप्रत्यक्षजनकत्वमेव तथास्त्वत्र सत्त्वस्य तथात्वे न तदुपनयविज्ञानागाउपपत्तेः
किं च तत्र संयुक्तसमवायस्य ग्राहकत्वे अतीतसौरभेणोपनयानुपपत्तिः षोढा प्रत्यासत्तेर्वर्त्तमानार्थग्राहकत्वात् अत एव चंदने सौरभमित्यत्र ज
नकत्वेपि घ्राणेन चंदनसंयोगस्य न द्रव्यप्रत्यासत्तिता तथात्वे तद्विशेष्यकप्रत्यक्षतापत्तेः अत एवोपनीतं विशेषणतयैव भासत इति नियमः त
द्विशेष्यके तदसामर्थ्यात् मानसे तूपनीतभाने अनियमस्तयोर्द्वयोरपि तद्योग्यत्वादुपनयविशेषणत्वे विशेष्यभाने विशिष्टबुद्ध्यनुदयापत्तेः व
स्तुतस्तु प्रत्यासत्त्यंतराभावोस्तु वा स्वयोग्यो वर्त्तमानो विषयो द्रव्यरूपादिर्यथायथं वक्ष्यमाणषोढाप्रत्यासत्तिग्राह्य एवेति यदि गृह्यते तदैव

प्र.प. ॥७४॥ नो चेत् न गृह्यत एवेति दंडादेर्ज्ञानलक्षणया ग्रहणं कैव नास्ति यत्र तत्र योग्यो विषयश्चक्षुः सौरभादिर्येन वा घटे रक्ते अविद्यमानमुपनीतं
श्यामत्वं तत्रो नयनादिसंयुक्तसमवायस्य स्वतोऽग्राह्यकतया ज्ञानलक्षणैव प्रत्यासत्तिरिति न लौकिकतासंयुक्तसमवायेन वर्तमानस्यैव ग्रहा
त् अन्यथा संयुक्ते घटे जातिविशेषग्रहापत्तिः न च विषयस्य हेतुत्वान्न तथा नत्वनियमस्यापि तत्प्रत्यासत्तिनियतत्वात् अन्ययोपनीतस्य यन्यतो
ऽज्ञानापत्तेः तस्मात्त्वयोग्यवर्तमानविषयेतरत्र तत्प्रत्यासत्तिनियम इति तत्प्रत्यासत्त्यभावेन स्यतत्स्य विषयस्याग्रह एव ननु तद्विशेषण
ज्ञानात्मकप्रत्यासत्तिः हि विशिष्टधीरत एव वक्ष्यते विद्यमाने चक्षुर्योग्ये ज्ञानलक्षणायां सत्यामपि न चाक्षुषात्विंद्रियसंयोगाभावात् अनु
मानमेव एवं रूपादावपि वर्तमान इति सर्वमवदातं ॥ ननु स्वायोग्यगोचरज्ञानमपि यदि ज्ञानलक्षणया तदा चक्षुषा सौरभविशिष्टकम
पि ज्ञानं जन्येतेति चेत् न ज्ञानलक्षणाया अयोग्ययोग्यविभागाभावात् वस्तुतो ज्ञानलक्षणा न चक्षुरादेः प्रत्यासत्तिः चक्षुषा ज्ञान[illegible]सन्नि
लैकविकाद्यादिमूलस्य मानसज्ञानस्यापि चाक्षुषत्वापत्तिः चक्षुःसंयुक्तसमवेतविशेषणतायां मनसैव संजाता । न च प्रत्यासत्तिकृतं राम
ज्ञानं न चाक्षुषमिति वाच्यं । तज्जन्यत्वस्य तत्प्रत्यासत्तितायामकिंचित्करत्वात् अन्यथा सौरभज्ञानं घ्राणजं चाक्षुषविशिष्टज्ञाने चक्षुः प्रत्या

सत्तिः सुतरां तन्मते पि न स्यादिति तु न यथापि न सा चाक्षुषप्रत्यासत्तिः किंतु मानसः। जनकेंद्रियप्रत्यासत्तेः प्रत्यक्षहेतुत्वे प्रत्यासन्नमिंद्रियं जनकं
न तु जनकया यदिंद्रियप्रत्यासत्त्या यावत्प्रत्यासत्तिमदिंद्रियवान् च मनोगत्या सन्नमेव जनकं अन्यत्र बहिरिंद्रियजन्यदृष्टमिति किं न प्रत्यासत्तेति
वाच्यं। विशेषणविशेष्ययोर्नयेंद्रियसंनिकर्षस्य हेतुत्वात्तस्य चेनयेंद्रियसंनिकर्षेणान्यतरसंनिकर्षेणापीति किं विरुद्धं। न चेनयेंद्रियसन्निक
र्षजन्यत्वेन चाक्षुषत्वमानसत्वयोर्विनिगमनाविरहः मनोमात्रजन्यत्वस्य मानसत्वप्रयोजकत्वमित्यवश्यं वाच्यत्वात् न च संनिकृष्टमनोज
न्यत्वमेव तथा लाघवादिति वाच्यं शाङ्कविशेष्यकोपनीतभानस्थले हि ज्ञानलक्षणात्मके विशेषणसंनिकर्षस्य श्रोत्रप्रत्यासत्तित्वमसंभावि
तं संयुक्तसमवायात्मकस्य श्रोत्रात्मसंयोगाभावेनाभावनियमात्तथा च नस्य मनःप्रत्यासत्तितायामुक्तनयसिद्धायां मनोमात्रजन्यत्वस्य मानसप्रयो
जकत्वमिति त्वया पि वाच्यमिति संक्षेपः। अनागतेति प्रत्यासत्तित्रयमुक्तं अनागतगोचरसाक्षात्कारजनकमिति। नन्वतद्जनकप्रत्यासत्तिजन्यप्र
त्यक्षमित्यर्थः ननु वर्तमानतोपाधिना प्रत्यासत्त्या जनिते ज्ञाने विद्यमानं घटमहं जानामीति ज्ञानलक्षणाजन्ये ऽतिव्याप्तिः ज्ञानत्वसामान्यजन्य
ज्ञानानुव्यवसाये ऽव्याप्तिश्च अनागतपदस्याजनकत्वपरत्वे जनकत्वसामान्यलक्षणाजन्ये चातिव्याप्तिरिति चेत् नैवं। अनागतगोचरं साक्षा

प्र॰प॰
॥७५॥

त्काराद्हेतुप्रत्यासत्तिजन्यत्वस्य नष्टव्यत्यासेन विवक्षितत्वात् नचैवमप्युक्तदोषः स्वयोग्यवर्त्तमानविषयत्वावच्छेदेनैव संयोगादीनां प्रत्यासत्तितया
तस्य तद्योग्यत्वात् सामान्यादीनां च प्रत्यासत्तित्वं स्वाश्रयप्रत्यक्षमात्रं प्रति स्वाश्रयत्वं चानागतसाधारणमिति न वर्तितद्योग्यत्वं अनागतवृत्तिधर्मा
वच्छिन्नविषयताकसाक्षात्काराद्हेतुत्वस्योक्तलक्षणार्थस्य तत्र बाधात् न हि कारणत्ववर्त्तमानत्वादेः प्रत्येकं प्रत्यासत्तितापि तेनैकवृत्तिधर्मत्वेन
स्वाश्रयसाक्षात्कारं प्रति स्वाश्रयत्वं चानागतसाधारणं अत्रापि पूर्ववदेव स्वविषयानागतगोचरसाक्षात्काराद्हेतुप्रत्यासत्तिजन्यप्रत्यक्षत्वं लक्षण
मिति सर्वं सुंदरं अन्ये त्विति तथा च योगजधर्माजन्यजन्यप्रत्यक्षत्वमेव लक्षणमित्याशयः अत्रैवं व्यवहारातिक्रमे योगजधर्मजन्यत्वमपि त्यक्ष्यतां
तस्यापि संस्कारस्यादृष्टरूपस्य वा उक्तन्यायेन इंद्रियसंबंद्धविशेषणतात्वस्य तु वचत्वात् तस्माद्व्यवहारानुरोधात् य   संप्रदायमेवसम्य
गित्यपि संधाया स्वरसो अन्ये त्वित्यनेन दर्शित इत्यवधेयं। विशेष्यत्वेनेति। स्वजनकेंद्रियप्रत्यासत्त्याश्रयत्वेनेत्यर्थः लौकिकत्वस्य निरुक्तस्यावच्छे
देन प्रत्यक्षं प्रति तथा जनकत्वात् प्रत्यासत्तौ सत्यां शाब्दविलंबेन प्रत्यक्षविषयत्वात् तथाविषयस्य जनकत्वावधारणात् यथाश्रुते तत्संजनवापत्तेः राम
विशेष्यत्वस्य विषयत्वविशेषणतया ज्ञानसमानकालीनत्वेन ज्ञानपूर्ववर्त्तितानवच्छेदकत्वात् कार्यपूर्ववृत्तेरेव कारणतावच्छेदकत्वात् न हि

ज्ञानोत्पत्तेः पूर्वं तस्य विषयतास्ति तथा सति तदैव ज्ञातत्वव्यवहारापत्तेः न च विषयतायोग्यता तथा विषयताया एव विशिष्टधीजननयोग्यतारूपतया तद्यो
ग्यत्वाश्रयं न यात्र न चेंद्रियस्यापि तथात्वादलौकिकप्रत्यक्षातिव्याप्तिः न हि हेतुतावच्छेदकावच्छिन्नयावज्जन्यत्वपर्यंतमर्थ इति वाच्यं इंद्रियविशेषितसं
निकर्षस्याइंद्रियावृत्तेः विशेषणस्य तत्रावृत्तेः विशेषणस्य तत्रावृत्तौ विशिष्टस्य तद्वृत्त्यसंभवात्। तदुक्तं कुसुमांजलिप्रकाशे इंद्रियस्य प्रतियोगित्वेना
श्रयत्वमितीति नावः। इंद्रियत्वेनेति। स्वजनकेंद्रियप्रत्यासत्तिप्रतियोगित्वेनेत्यर्थः तथा च चक्षुःसंयोगत्वादिना तत्तद्विषयतत्तज्ज्ञानकारणत्वेग्र
हीति प्रत्यक्षत्वावच्छिन्नं प्रति स्वजनकेंद्रियप्रत्यासत्तिप्रतियोगित्वेनेंद्रियाणां कारणत्वग्रहात् यथाग्रे वाच्यमिंद्रियत्वं तु न प्रत्यक्षजनकतावच्छेदकं
ज्ञानजनकताया एव संयोगताया इंद्रियमनोयोगत्वादिना ग्रहेऽन्योन्याश्रयात्। न च चक्षुर्मनोयोगत्वादिना तद्ग्रहः। तथापि सहकारीभूतत्वेन संयो
गस्यावच्छेदकत्वाभावादन्यथा सहकारिमात्रोच्छेदप्रसंगात्। मानससाक्षात्कारजननकाले मनस इंद्रियांतरसंयुक्तत्वरूपेंद्रियत्वाभावेन तत्राज
नकत्वापत्तेश्च न च त्वङ्मनोयोगस्य ज्ञानमात्रजनकतया तदापि तत्संयोगसत्त्वान्न सो नैवमिति वाच्यं। त्वचो ज्ञानमात्रजनकत्वपक्षेऽपि शरीरत्वकृ
त्संयोगेनैवावश्यकेनान्यथासिद्धस्य त्वङ्मनोयोगस्याहेतुत्वात् अन्यथोक्तलक्षणस्य त्वचाव्याप्त्यापत्तेः नन्वेतयापि स्वजनकेंद्रियप्रत्यासत्तिप्रति

प्र·प योगित्वमर्थो वाच्यो न तु स्वजनकप्रत्यासत्तिप्रतियोगिना न तथा सत्येवं अन्यज्ञानमात्र एव जनकत्वसंभवात् तथात्वेन तज्जन्यत्वस्य ज्ञानमात्र एवा
॥७८॥ तिव्याप्तेः अन्यथा त्यक्तत्वस्य तद्विशेषणत्वासामान्ये वाधकाभावात् कार्यतानवच्छेदकत्वात् सामान्ये वाधए व विशेषे प्रमाणवदृत्तेर्न हि अन्यज्ञानजनकप्र
त्यासत्तिप्रतियोगिनो नात्मादेस्तज्जनकत्वं असंभवात् तज्ज्ञानएव अथैन्द्रियत्वं लक्षणं यत्त्वन्यथा तस्य जनकतानवच्छेदकत्वे तदुपन्यासस्यार्थान्तरतापत्ते
:तथा च मानससाक्षात्कारजननकाले मनसो उक्तरूपेन्द्रियत्वाभावस्तत्वापि दोषइति चेत् एवं भवतामुक्तसंयोगाश्रयत्वस्यावच्छेदकतया का
र्येऽपूर्वप्रवेशस्यावश्यं तदेकश्लिष्ट्याभ्युपगमेन तदसंभवस्य दोषत्वात् अस्माकं मनन्तिप्रसंगार्थोदितिरव्यावर्तकमिन्द्रियत्वमात्रमवच्छेदके प्रवेशितेन त
स्य यदा कदाचित् तादृशसंयोगवत्त्वएतावतैवानिन्द्रियव्यावृत्तेरिति महदेवष्यं किंचैवं मनोन्तरस्यापि त्वन्मते जनकतापत्तिर्यदि तत्संयोगस्यो
पलक्षणत्वं अस्माकं तु तदिन्द्रियत्वेपि न क्षतिरिति दिक्। स्मरतीति स्मृतिस्वरूपायोग्यज्ञानकारणमनोयोगाश्रयत्वमित्यर्थः अत्र चात्मपदेनात्मा
द्वितीयेन घटादयो ह्यालोकसंयोगमादाय तृतीयेनापि घटादयो वारिता इति स्मर्तव्यं। शब्देति। शब्देतरोद्भूतविशेषगुणस्तदनाश्रयत्वे स रा
ति ज्ञानहेतुमनोयोगाश्रयत्वमित्यर्थः तेन सत्यन्तविशेषणेन घ्राणशरीरादौ ज्ञानपदेनाकाशादौ मनःपदेनेन्द्रियाश्रये वे अतिव्याप्तिर्वारितान

वतीति तेषां प्रत्यक्षगुणवत्वादुदासीनमनोयोगवत्वात्ताहशात्मसंयोगवत्वेपि तन्मनोयोगस्य ज्ञानाहेतुतया ज्ञानहेतुमनोयोगानाश्रयत्वादिति
भावः। विशेषपदं च प्रत्यक्षप्रतिबन्धकादृष्टवत्वाभावरूपमुद्भूतत्वमिति मते तत्संयोगादावपीति तमादायासंभववारणाय। अत्र वदंति।
शब्देतरपदं विशिष्टाभावनिर्वाहकतया श्रोत्राव्याप्तिवारकं अन्यथोद्भूतविशेषगुणानाश्रयत्वं श्रोत्रे अव्याप्तमेव स्यात्तथा च व्यर्थविशेषणता
अव्याप्ते भागासिद्धिरूपायाः व्यावर्त्तकं यद्विशेषणं तस्य व्याप्तिग्रहानौपयिकतया व्यर्थत्वादिति। अत्र विशिष्टाभावतया न व्यर्थविशेषणत्वे
त्वेकेन भागासिद्धिवारकमपि व्यवहारे साध्ये व्यभिचारवारकमेव पृथिव्या घटत्वलक्षणत्वे पृथिवी घटत्वनिमित्तकपृथिवीव्यवहारविष
योघटत्वादित्यादौ पटेपि पृथिवीव्यवहारात् घटत्वनिमित्तकपृथिवीव्यवहाराभाववत्तयागृहीते घटे घटत्वसत्वेन व्यभिचारात्। अ
प्रसिद्धिवारकं वाहेतौरेव निमित्ततया साध्यप्रवेशो घटत्वनिमित्तकपृथिवीव्यवहाराप्रसिद्धेः घटादिसंग्राहकविशेषणप्रक्षेपेतु त
न्निमित्तव्यवहारस्य साध्यतया व्याप्तिग्रहौपयिकतया साध्यकत्वमिति पक्षेऽपि तथेत्यपरे। वस्तुतस्तु विशिष्टाभावो अविशिष्टाभा
वो वा शब्देतरोद्भूतविशेषगुणाश्रयान्योन्याभावो हेतुरुत यथापि न व्यर्थविशेषणता द्विविधं हि विशेषणं एकं व्याप्यतावच्छेदकोपाधि

प॰ पु॰ ॥७७॥ संकोचकं यथा नीलधूमत्वशरीरजन्यत्वादौ नीलत्वशरीरत्वादिनाभ्यां विशेषणाभ्यां हि प्रत्येकं तयोर्धूमत्वजन्यत्वयोर्न्यूनवृत्तितापादनेन सं
कोचात् अपरं च तत्प्रसारकं यथा प्रमेयत्वादौ तत्र हि प्रमात्वस्य न्यूनवृत्तितया तद्विषयत्वविशेषणेन विश्वसंग्राहकेणावच्छेदकप्रसारणा
त् तत्राद्यमेव दूषणं नानिष्टं तन्निरूपितव्याप्तेस्तद्विनापि ग्रहात् न त्वपरमपि प्रमातिरिक्तेन तन्निरूपितव्याप्तेस्तेन विना च ग्रहनियमात् न
च प्रमांशेन स्यूतैव यथा तद्विशेषणावच्छेदेन सामान्यतो व्याप्तिग्रहस्य प्रमाविषयत्वात् अन्यथा केवलान्वयिनि दत्तजलांजलावनुमाने
विधानमपि शास्त्रे विरुध्येत न च केवलान्वयिसाध्यकतया तत्र विभागः इति वाच्यं न्यायसाम्येन प्रमेयत्वसाध्यतावच्छेदकस्यापि दूषणत्वात्
तद्व्यर्थविशेषणत्वात् न चैवं धूमालोकान्यान्यत्वेऽपि न व्यर्थविशेषणतेति वाच्यं तत्र तदन्यान्यत्वेन संग्राह्ययोर्धूमालोकयोस्तदन्यान्य
न्यत्वविशिष्टधूमत्वालोकत्वाभ्यामेव व्याप्तिग्रहसंभवात् तस्माद्यावत्संग्राह्यगोचरव्याप्तिरवच्छेदकप्रविष्टैकदेशेन शक्यग्रहा तत्र वि
शिष्टेनावच्छेदकं गौरवात् तत्र व्यर्थविशेषणता यथा नीलधूमत्वधूमालोकान्यान्यत्वादौ यत्र चैकदेश एव न सम्बद्धैकदेशेन व्याप्तिग्राह रा
कोऽवच्छेदकावच्छिन्नयावदधिकरणनिष्ठव्याप्यग्राहकोऽवा तत्र न तद्व्याप्यतावच्छेदकं न तु तत्र व्यर्थविशेषणता यथा धूमत्वं यथा वा पाला

लवह्नौपांडुरद्रव्यत्वंयथावाप्रमेयत्वाभिधेयत्वादि अतएवगुणत्वंताभावाभावत्वादिकं अनेकमवृत्तिहतौहेतुमाहइदत्ते एवंचात्रप्रकृतेशब्देत
रविशेषणाद्वैशेषद्भूतविशेषगुणवदन्योन्याभावगर्भेतायांश्चानिष्ठस्थानहेतुमनोयोगवृत्तिव्याप्तेरग्रहतत्संग्राहकशब्देतरोद्भूतविशेष
गुणवदन्योन्याभावगर्भेतायांतन्निष्ठव्याप्तेरपिग्रहसंभवेयन्निष्ठायन्निरूपितेतिन्यायाव्यर्थविशेषणतानतन्न्योपिहेतुःसाधकइतिनव्यर्थवि
शेषणताबीजंआर्द्रेंधनस्यहमातुमापकत्वेत्याद्रेंधनजन्यवह्निमत्वेतदभावात्लघुन्यस्यसाधकत्वेत्यस्यासाधकत्वंबीजाभावात्अतिप्रसंगाच्च
नवाविशेषितेनतत्कार्यकरणमित्येववैयर्थ्यंतत्संग्राह्यनिष्ठव्याप्तिग्रहस्यतत्कार्यस्याविशेषितेनाकरणात्एवमन्यत्राप्यव्याप्तिवारकेविशेषणे
दृष्टव्यंतत्रापितद्विशेषणसंग्राह्यनिष्ठव्याप्तिग्रहस्यतेनविनाऽभावनियमेनसार्थकत्वात्·एतेनलक्षणमिदंमनोयोगगर्भंमनोपिलक्ष्यप्रविष्टं
तथाचमनसिमनस्त्ववैशिष्ट्याग्रहेप्रकृतलक्षणमेवकुत्रगृहीतमत्रेततएवमनसिसाध्यसिद्धौसेनवंत्यामपरसंग्राहकापरविशेषणानांव्यर्थता
तेषांव्याप्तिग्रहानौपयिकानांभागासिद्धिमात्रवारकत्वादितिकेषांचिद्दूषणमलग्नकंव्याप्यतावच्छेदकविकासकविशेषणस्यव्याप्तिग्रहौपयिक
विशेषणवत्वेनसार्थकत्वात्किंचनचेदव्यर्थविशेषणताव्याप्यतावच्छेदकावच्छिन्नविशेषणविशिष्टहेतौतादृशविशेषणस्येवमूकत्वेनसार्थक

ग१

प्र·प
॥२७२॥

त्वात् यथा नीलधूमशरीरजन्यान्योन्याभाववत्त्वाल्लिंगस्य व्याप्यतावच्छेदकधूमत्वजन्यान्योन्याभाववत्त्वरूपव्याप्यतावच्छेदकावच्छिन्नस्योपस्थि
तौ तत एव व्याप्तिग्रहे नीलशरीरे विशेषणे व्यर्थे· न चेह तथा मनस्त्वलिंगितया मनस्त्वस्य लिंगत्वेन लिंगतावच्छेदकं मनस्त्वं प्रतीत्य व्याप्तिर्ग्राह्या।
न चोभयोर्योगाश्रयत्वरूपहेतुग्रहे मनस्त्वग्रहवन्मनस्त्वत्वस्यापि ग्रहीये न व्याप्यतावच्छेदकावच्छिन्नैकदेशागमकतया विशिष्टहेतौ व्यर्थविशे
षणता अत एव प्रमेयत्वादावपि न व्यर्थविशेषणता तत्रैकदेशप्रमात्वस्य प्रमात्वेनानुपस्थितत्वात्· नहि तदवच्छिन्नं तत्र विशेषणमिति न किं
चिदेतत्· अपि च अव्याप्तिवारकमपि विशेषणं व्यभिचारवारकमेव तथाहि· द्विविधा हि लक्षणस्येतरभेदकता भेदाश्रयं पक्षीकृत्यान्वयेन इ
तरं पक्षीकृत्य व्यतिरेकेण च· तथा चानिंद्रियाणि इंद्रियभिन्नभेदप्रतियोगीनि उद्भूतविशेषगुणानाश्रयत्वसमानाधिकरणज्ञानकारणमनो
योगानाश्रयत्वादिति प्रयुज्यमाने श्रोत्रे व्यभिचार इति तद्विशेषणं एवमव्याप्तिवारकविशेषणे अन्यत्रापि लक्षणं कर्तनीयं न चैवमितरभेदा
नुमाने अतिव्याप्तिवारकविशेषणानुपादानापत्तिः तद्भिन्नापीतरे पृथिवीभिन्नभेदप्रतियोगिनः नीरसत्वादित्यस्यापि समीचीनत्वे रसवत्त्वस्या
पि तल्लक्षणतापत्तिरिति वाच्यं इतरत्वं लक्ष्यतावच्छेदकसमनियतभेदप्रतियोगितावच्छेदकं लक्षणाभावसमनियतत्वादित्यत्रोक्तानुमान राम

तात्पर्यात् आ परमाणोरित्यादिग्रंथदर्शनेन तादृशभेदस्य साध्यत्वेनोक्तरूपसाध्यस्यावश्यकत्वात् तत्र च घटत्वरसवत्त्वादेः व्याप्यतिव्याप्तलक्षण
त्वेन पृथिव्यां घटत्वाभावनीरसत्वसमनियतत्वादिति हेतुः कर्तव्यः तथा च व्यभिचारोऽघटत्वावच्छिन्नान्योन्याभावस्य घटमात्रावृत्तित्वेन पृथिवी-
त्वसमनियमाभावेनान्योन्याभावप्रतियोगितायास्तदनवच्छेद्यत्वाद्व्यभिचारस्य स्फुटत्वात् एवं च नीरसत्वावच्छिन्नान्योन्याभावस्य रसवन्मात्रवृ
त्तित्वेन पृथिवीत्वासमनियततया व्यभिचारस्तु उक्तक्रमेण बोध्यं न च पृथिव्याः पृथिवीत्वे लक्षणे पृथिवीत्वाभावसमनियतत्वादिति हेतौ समनि
यमपर्यंतं विशेषणमप्रयोजकं पृथिवीत्वाभावव्याप्यत्वस्यैव व्यत्वेतद्व्यापकत्वस्याघटत्वे व्यभिचारवारकत्वात् न चैवमितरभेदानुमानेऽसा
व्याप्त्यसिद्ध्या दुर्लभं पृथिवीत्वं किंचिद्भेदसमनियतं व्यतिरेकित्वादिति सामान्यतोदृष्टावतारेण सुलभत्वादिति दिक् ज्ञानेति ज्ञानं संव्यापारं नय
नेत्यर्थः विशिष्टेति अत्र विशेषणज्ञानमात्ररूपायाः सामान्यसामग्र्या विशेषणतावच्छेदकावच्छिन्नविशेषणज्ञानरूपाया विशेषसामग्र्या वा जनकत्वा
दिति भावः नष्टेति अनुभवं प्रति ज्ञानस्य प्रत्यासत्तित्वकल्पनात् संस्कारस्य कल्पनीयत्वाभावादित्यर्थः स्मृतित्वइति अन्यथा अनुभवकारणसम
वहितसंस्कारजन्यत्वस्य स्मृतित्वप्रयोजकत्वे गौरवादत एव विशिष्टानुभवेऽव्यवहितविशेषणज्ञानं कारणमित्यपि वदंतीति भावः वयंतु संस्कारे

प्र·प ॥७९॥ नोद्बुद्धं न वा जनकप्रत्यासत्तिः तथा सति समाने विषये सर्वापेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन पूर्वानुभवात्मकविशेषणज्ञानेन संस्कारद्वारकप्रत्या
सत्तिद्वतेन तेन संस्कारेण च सर्वत्र विशिष्टप्रत्यक्षसामग्र्या विशिष्टप्रत्यक्षनियमेन स्मरणमात्रापलापापत्तेः न च प्रत्यासत्त्यर्थं स्मरणमिहाप्यपेक्ष्यतां न
विशेषणज्ञानत्वेनेति वाच्यं तदावश्यकत्वे तेनैव निर्वाहे विशेषणज्ञानांतरानपेक्षणात् न चानुभावकसहकृतस्यैव संस्कारस्योद्बुद्धजनक
प्रत्यासत्तित्वं गौरवात् स्मरणे तथादर्शनात् तद्विषयत्वस्य तन्मते प्रत्यासत्तितावच्छेदकत्वात् वस्तुतस्तु तस्यानुभावकप्रत्यासत्तित्वेन त्राप्यनुभा
वकसाहित्यस्य संभवादिति। इदं तु योगिप्रत्यक्षाव्यापकं तस्य निदिध्यासनादिद्वारा पूर्वपूर्वप्रतिपत्तिकारणकत्वादिति केचित् तन्न ज्ञानत्वगर्भ
धर्मावच्छिन्नकारणकत्वाभावस्य विवक्षितत्वात् न च शाब्दत्वानुमितित्वादिना कारणत्वस्यावच्छेदादनुमित्यादौ लिंगज्ञानत्वादिना न च श्रोतव्य
: श्रुतिवाक्येभ्य इति स्मरणात् श्रुतिवाक्यजज्ञानत्वेन तत्रापि कारणता श्रुतिविषयकप्रत्यक्षस्य तत्कारणत्वेन श्रुतिजन्यशाब्दत्वेन तन्न का
रणत्वात् तदपेक्षया श्रुतिजन्यश्रुत्यर्थज्ञानत्वस्योपाधितया गुरुत्वात् वस्तुतस्तु आत्मविषयकशाब्दत्वादिना च तत्र जनकत्वं न तु श्रुतिजन्यत्व राम
मपि तत्र प्रविष्टं। अदृष्टकल्पनापत्त्या श्रुतिपदस्य प्रमाणपरत्वात् न चैवमपि विवक्षिते अभावप्रत्यक्षाव्याप्तिः तस्य प्रतियोग्यारूपपूर्वकत्वात्।

आरोपस्य च प्रतियोगिस्मृतिपूर्वकत्वात् आरोपस्य च प्रतियोगिस्मृतिजन्यत्वात् अन्यजनकत्वस्य च व्यापारत्वात् एवं व्याप्तिप्रत्यक्षस्यापि धूम-
ज्ञानजन्यसामानाधिकरण्यज्ञानजन्यत्वाद् व्याप्तिरिति वाच्यं यदवच्छिन्नं प्रतिजनकीभूतो व्यापारो येन विना तदवच्छिन्नं न जनयति तस्यैव व्यापा-
रत्वात् अस्ति च तथा लिंगपरामर्शो हि अनुमितित्वावच्छिन्नं प्रतिजनकीभूता व्याप्तिधीस्तद्विना न तज्जनयति प्रकृते तथाभूतज्ञानत्वावच्छिन्नं प्रति-
जनकीभूता प्रतियोगिधीर्न च भावप्रत्यक्षं प्रति न चारोपं विना सामान्याभावविषयं जनयति अभावानुमितौ व्यभिचारात् । एवं व्याप्तिप्रत्यक्षेऽपि साध्य-
सामानाधिकरण्यज्ञानत्वेन न हेतुता व्यतिरेकसहचारज्ञानादपि व्याप्तिग्रहात् न च सोऽपि धूमज्ञानजन्यः किंतु धूमाभावज्ञानजन्यः न चाधूमा-
भावज्ञानजन्येऽपि तद्द्वारा धूमज्ञानकारणतामानाभावात् कुलालपितृवदन्यथासिद्धत्वात् तस्मात् पितापुत्रयोरिव घटे प्रतियोगिज्ञानादित-
दारोपयोरेकतरजनकता न तु व्यापारव्यापारिभाव इति साधूक्तं ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभाव इति अत एवेश्वरज्ञाने नेंद्रियादि-
व्यापारकेणापि जन्यत्वादसंभववारणाय ज्ञानेऽजन्यत्वं विशेषणमिति कश्चिद्व्याख्यानमनादेयं न हि कार्यत्वावच्छिन्नं प्रति जनकमीश्वर-
ज्ञानमिंद्रियादि विना न तज्जनयति इंद्रियाजन्यकार्याप्रसक्तेः न च फलीभूतप्रमालक्षणे न गतव ज्ञानसाधारण्ये दोषः साक्षात्त्वलक्षणे इदसा

प्र·प
१२०॥

मान्यं लक्षयित्वाजन्यपदादिदाने न फललक्षणाद्दृष्टान्तः प्रमायालक्ष्यत्वेप्रमात्वविशेषलक्षणावश्यकत्वेन तत्रोऽव्याप्ति   र्थक्त्वाति व्याप्ति
शंकेति सर्वमवदातं प्रत्यभिज्ञेति पूर्वोक्तजन्यवृत्तियोगिज्ञानापेक्षावुद्धिजन्यत्वाद्बुद्धियामिति भावः किंत्विति न च द्वित्वविषयत्वे अपेक्षावुद्ध्यपेक्षण
तत्राप्यप्रत्यक्षतापत्तिः तन्मते समूहालंवनमात्रस्यैवापेक्षावुद्धितया तद्धंग्यत्वेतद्विषयत्वमित्येवपरसिद्धांतात् न चैवं प्रागुक्तत्वद्व्याप्तिविरो
धः अयं घटोयं पटइति प्रत्येकैकत्वसविकल्पकानंतरं समूहालंवनस्य द्वित्वविषयस्योत्पत्त्या तत्सापेक्षत्वेनाव्याप्त्युपन्यासात् न चैवमपि मयं
थेनापि तदनुत्पादः समूहालंवनत्वेतदपेक्षानवुद्धित्वविषयत्वे तत्रसमूहालंवनत्वस्यैवप्रयोजकत्वमित्यभिसंधानेनाप्यिमग्रंथेन तदुक्तरूपा
दिति निर्णीतमित्यंशो मानंशो चेत्यर्थः। ज्ञानाजन्यत्वात्तथा चस्वतरां सविकल्पकाजन्यत्वमिति भावः ज्ञानाजन्यत्वमपहायसविकल्पकत्वार्थ
त्वप्रयोजनमाह ज्ञातावितिि। ननु सादृश्यत्वविशिष्टसादृश्यवैशिष्ट्यप्रत्यक्षे विशेषणज्ञानीभूतसविकल्पकजन्यत्वाभावाद्व्याप्तिरित्यतआह सादृ
श्यादीति सादृश्यत्वादीत्यर्थः धर्म्मित्विति। संस्कारद्वारा तस्य हेतुत्वं तथा च संस्कारजनकत्वं येन रूपेण तेन तद्धेतुत्वं ... संस्कारजनकत्वेन राम्
सविकल्पकत्वे नालोचन...पि तज्जनकत्वादिति भावः तत्रासविकल्पकादेव तत्तत्प्रकारीभूतत्ताज्ञानमात्रात्पूर्वमपि चेत्तत्त्वाज्ञा

त्वेन जनकतानर्हत्वमिति चेन्न अपि लिंगज्ञानत्वेन जनकत्वमस्तु ज्ञानमात्रादनुत्पत्तेरिति प्रतिबंदिमनसिकृत्याह अन्वमितीति तथा च तत्रा
पि हेतुतापत्तेरित्यर्थः तथा च यथा तत्र न तत्वेन जनकत्वं तथा न तत्रापि काशीपीति भावः संस्कारार्थतायां तु व्याप्यतावच्छेदकप्रकारकलिंग
ज्ञानस्य व्याप्यत्वप्रकारकलिंगज्ञानस्य वा हेतुत्वादसंभव एव [illegible] तु येन रूपेण संस्कारजनकत्वं इत्यादि तत्र फलबलापारोपत्येकरूपेण
जनकताया वक्तुं शक्यत्वमिति चारादिति । परो वेति । स्मृतिरूपत्वेच्छनयोर्जनकत्वे नोनयानानुनयापत्तेरिति दूषणं वक्ष्यमाणयुक्त्या शब्दा
नेदेनाजनकत्वादिति नन्विंद्रियजन्यत्वमात्रेतु मित्याशंक्य अतिव्याप्तिरित्याह ज्ञानेति तथा चातिप्रसंगः [illegible] कल्पितमप्यतिप्रसंजकमे
वेति तदर्थमन्यतरकल्प्यमिति भावः नन्वेवं सविकल्पकानपेक्षत्वसापेक्षत्वयोरेकत्राभावाद्विषयभेदे न च तज्जन्यत्वाजन्यत्वा[illegible]
साक्षात्वं जातिरेवेंद्रियप्रयोज्या वाच्या तथा च सर्वज्ञानमिति मानं [illegible] प्रत्यक्षं नेत्याह एवमिति नन्वेंशांशिनाभेदे [illegible] न्यथा [illegible]
प्रयोज्यप्रमात्वाप्रमात्वयोः कथमेकत्रसंभवः कथं वा एकमेव ज्ञानमंशभेदेन प्रत्यासत्तिभेद अन्यत्वेन लौकिकमलौकिकं च नचां
शभेद जन्यत्वाजन्यत्वाभावात प्रमात्वाप्रमात्व लौकिकालौकिकत्वासंभवः किंतु निरंशकतया ज्ञानस्याखंडमेव [illegible]

प्र.प
॥८१॥

नासंनिकर्षजन्यं च एवं चाखंडमेव ज्ञानं प्रमात्वाप्रमात्ववल्लौकिकालौकिकत्ववच्च किंतु तत्तद्विषयतावच्छेदेन तत्तज्जन्यत्वं तत्तद्विषयघटितं
च प्रमात्वादीति वाच्यं एवं = दि ममयद्विषयत्वेन सविकल्पकजन्यतावच्छेदकं तद्विषयज्ञानत्वं तत्साक्षात्त्वमतिकिमनुपपन्नं । [illegible] तत्तासविकल्प
कस्य न तत्तासविकल्पकं प्रतिजनकता जन्यत्वजनकत्वयोरेकानवच्छेद्यत्वं नियमात् न तेदं ता विशिष्टज्ञाने प्रति इदंत्वांशे साक्षात्वापत्तिः
पूर्वं तत्तासविकल्पकस्य उत्तरसविकल्पकं प्रतिहेतुत्वेन सर्वसामंजस्यादिति सर्वपूर्वदोषोद्धारादपरितुष्यन् दोषांतरमाह इदंडीतितनवो
मेयेंद्रियसंनिकर्षस्य हेतुत्वे सप्तदूत्वेनापत्तेर्विशिष्टज्ञानोत्पत्तिरेवासाधारणकारणं॥ तर बाधात् परिशेषेण विशेषणज्ञानजन्यतया
दंडत्वविशिष्टदंडज्ञानजन्यत्वं दंडिज्ञानस्य साधयतीति भावः पूर्वं संनिकर्षत्वस्यैकस्याभावात् संयोगत्वादीनामननुगमात् कथं साक्षात्का
रजनकत्वं ग्राह्यमित्युक्तं तत्राह प्रत्यक्षेति । संयोगेनेति । इंद्रियसंयोगत्वावच्छिन्नस्य स्वयोग्यवर्तमानद्रव्यसाक्षात्कारं प्रतिहेतुत्वमित्यर्थः संयु
क्तेति इंद्रियसंयुक्तसमवायत्वावच्छिन्नस्य वर्तमानस्वयोग्यसंयुक्तसमवेतसाक्षात्कारं प्रतिजनकत्वमित्यर्थः एवमग्रेपि समवायेति । शब्द राम
प्रत्यक्षं प्रति कर्णसंयोगावच्छिन्नश्रोत्रसमवायो हेतुरित्यर्थः एवमग्रेपि । इंद्रियेति इंद्रियसंयुक्तविशेषणतया तत्समवेतविशेषणतया त=

त्समवेतसमवेतविशेषणतयासमवेतविशेषणतयासमवेतसमवेतविशेषणतया विशेषणविशेषणतया चेत्यर्थः [illegible]दिति। जलत्वादिनि
ष्ठरूपादिनिष्ठरूपत्वादिनिष्ठशब्दनिष्ठशब्दत्वादिनिष्ठसमवायनिष्ठघटाभावादेरित्यर्थः नन्विंद्रियार्थयोर्योग्ययोः संनिकर्षस्य पृथिवीत्वं नष्ट
स्यात इत्यत आह योग्येति न केवलमर्थेंद्रिययोरेव योग्यता किंतु संनिकर्षस्यापि सोपि तद्विषये अनुगत एव न चार्थेंद्रियसंनिकर्षः पृथिवी
त्वादौ योग्य इत्यर्थः न तु संयोगोपि वेति। वाशब्दोऽनास्थायां। प्रकृते तस्य विचारस्याप्रयोजकत्वात् वस्तुतस्तु न संयोगहेतुतापेक्षया लघुत्वहे
तुसंयोगेस्थूलावयवावच्छेदकत्वे लाघवादिति। आत्मग्रह इति। तथा च रूपत्वादिविशेषाद्गुणयोरपि हेतुत्वं न त्वन्यतरस्येति भावः नन्वात्मग्रहे
न द्रव्यग्रहत्वेन जन्यता अपि त्वात्मग्रहत्वेनैव बहिरिंद्रियजन्यग्रहे तु संयुक्तसमवाय एव हेतुरिति नेत्याह न चेति लाघवेनेतीन्द्रियसंयो
गत्वेनैव द्रव्यग्राहकद्रव्यप्रत्यक्षं प्रति सामान्यतो हेतुत्वं निश्चयादित्यर्थः ये तु यथाश्रुतमेव व्याचक्षते तेषां संयुक्तसमवायकारणतायां कार्यतावच्छे
दककोटौ द्रव्यातिरिक्तत्वप्रवेशापवेशयोर्गौरवात्स्वत्वप्रवेशान्यतरदेव बाधकमिति न किंचिदेतत् साध्याप्रसिद्धिरित्युपलक्षणं स्वप्रत्यक्ष
जनकेंद्रियप्रत्यासत्त्याश्रयत्वे च न व्याप्तिमहत्त्वकस्यैकस्याभावादित्यपि द्रष्टव्यं। संयुक्तेति। न च यत्र ध्वंसमवायो यस्यां सा व्यक्तिरूपजन्या न हि तद्दे

.प वास्माकमपितद्गंधसमवायो अन्यत्रव्य विनिवार्यं नदैक्यसाधकतर्कौवह्नें ने न तदभिधानादिति नावः तदेतद्वित्यापाततः परमार्थेत
का१ स्तत्त्वसमवायीत्यत्र स्वंयद्वितत्तत्र रूपादि न दा नत्यत्वदेतदाश्रयसंयोगो हेतुरित्यनुगमः इंद्रियसंयुक्तसमवेत तद्वत्वंशनिरिंद्रियसंयुक्त
१२ समवेताश्रयसंयोगो हेतुरिति इंद्रियसंयुक्तसमवेत [illegible] स्वपदंच दिन दाव्यक्तमेव गौरवं स्वाश्रयसंयोगपरित्यागस्य संयुक्त [illegible]
वनागृहीतविशेषणान्यायेन हेतुत्वौचित्यात् विशेष्यांशस्यापि हेतुत्वापत्त्वेश्चादितिध्येयं । अन्यथेति । उक्तविकल्पेन न तत्रापि परंपरासंबंध
ज्ञावस्त्वर्थः [illegible] जाताद्रूपत्वस्य जातित्वाभावात् न तु [illegible] व्याप्यत्वादिति । नन्वाश्रयसाहश्येनाप्युपमाश्रितानांमनेकत्वादित्यरूपसं
नाहरूपादेयेति न तु [illegible] रूपमानादेव न प्रत्यक्षादिति पूर्वोक्तस्वरसात्तत्त्वात्त्यासन्निसिद्ध्यै हेतुत्वं तरमाह [illegible] ति । इत्येवानुमन्येत्युप
नालापः नानिदं रूपमिति शब्दाभिलापः इति विशेषः एवमग्रेपि अन्यथा रूपस्येव वर्णितया वृत्तिलक्षणं [illegible] त्यात्मकत्वेनयद्य
पीत्यादेरसंगतत्वापातादिति ध्येयं । चक्षुरिति [illegible] ग्राह्यगुणत्वादिकमित्यर्थः यथाश्रुते [illegible] संज्ञा रूपाजातावाप्य राम
ति व्याप्तिः न तु चाक्षुषत्वादि जातियोगित्वात् विषयत्वमात्रे [illegible] वहिरिंद्रियपद [illegible] वाच्यं । रूपत्वविशतिपन्नस्य ८१

ताद्दशज्ञानानवच्छिन्नप्रतिपत्तेः नचोपनीतभानावारणाय तद्द्वयं वाच्यमिति वाच्यं अध्यक्षत्वेन ग्रहणविशेषणस्योक्तत्वादिति अतींद्रियेति रूप
त्वेन रूपेणातींद्रियरूपानुमानापत्तेरित्यर्थः ननु ग्राह्यत्वेन योग्यत्वमिति अत आह योग्येति योग्यत्वं यावत्स्वरूपविशेषगुणत्वव्याप्यजातिमत्त्वं न जात्य
सिद्धौ संभवतीत्यर्थः प्रत्यक्षत्वेति यद्यपि यथाश्रुते तस्येष्टापत्तिः घ्राणादिवृत्तित्वेन प्रत्यक्षत्वापादनं घ्राणप्रत्यक्षत्वादेर्बाधितं तथापि घ्राणादि
घटितेंद्रियसंनिकर्षेण तत्प्रत्यक्षत्वापादनं इष्टं एवं न चक्षुर्जन्यत्वादिकं परिसामान्यं न देकत्र विरुद्धं तत्र रूपत्वादिति विप्रतिपन्नस्य शंकितमपि न
किंतु प्रत्यक्षानुकूलप्रतिकूलसमवधानं तदुन्नयं नञाश्रयविशेषरूपमेकस्याप्यविरुद्धमिति अरुचेर्दोषांतरमाह रूपत्वेति गंधरसेति त्रवृ
त्येकमेव गंधाव्यंजकत्वे सति नीलव्यंजकत्वादिति हेतुनेत्युमिति व्यंजकत्वं हेतोर्व्यर्थविशेषणत्वात् न च प्रत्येकं हेतुत्वे शिलाशकलएवव्यभि
चारः। नीलव्यंजकतयापदकस्य नीलव्यंजकत्वादिलक्षस्य विवक्षणात्। न चैवं तद्वारणाय स्पर्शाव्यंजकत्वेनैव विशेष्यतां कृतं परकीयपदद्वयेनै
नेति वाच्यं तथासति स्पर्शाव्यंजकनीलव्यंजकस्यैव गमकत्वे [illegible] वैयर्थ्यं स्यादावश्यकतया [illegible] प्रत्येकगर्भतया एवाभ्युपगन्तव्यत्वात् न सरेकु
व्यभिचारवारणाय परकीयविशेषणस्यावश्यकत्वात्। न चैवं प्रत्येकगर्भीयां गंधाव्यंजकपरकीयनीलव्यंजकत्वं तु शादरनीलरूपव्यंजके

ज्ञान १

त्र·प ८२ ॐ व्यभिचरतीति वाच्यं तस्य नवशरावगंधाभिव्यंजकत्वात् गंधव्यंजकत्वेन व्याप्तियोग्यताया विवक्षितत्वात् न चैवं प्रत्येकहेतुभिरितरजसत्वस
नेस्पर्शाव्यंजकत्वे सति पीतव्यंजकत्वं पित्तद्रव्ये व्यभिचरतीति वाच्यं प्रत्येकमंगभेदे तु प्रत्येकव्यभि...स्त्वत्र तत एव तैजसत्वानुमानं...व्याप्यग
मेन तत्रापरहेतुभ्यामेव तदनुमाने दोषाभावात् न चापि परकीयपीतव्यंजकत्वावश्यकत्वाच्च न चैवमपि निकषोपले गंधाव्यंजकत्व...
व्यभिचारः तस्य सुवर्णपीतव्यंजकत्वात् तत्र तेन पीतत्वावांतरजाते व्यंजनस्य न च स्पर्शाव्यंजकत्वगर्भे हेतौ नालोको दृष्टांतः स्यादिति वाच्यं
दीपचंद्रालोकस्य दृष्टांतत्वसंभवेन न तत्परतयापि सामान्यशब्दपर्यवसानादिति । द्रव्यपदं चा=धिकं प्रवेश्यं अन्यथा संनिकर्षव्यभिचार
पत्तेरिति एवं ब्राह्मणादीति न चवनीति कलहः तदज्ञानस्यावश्यकत्वात् तथाहि यथा रूपानुगतमतादिये घ्राणादीन् तथा गंधाद्यनुगतमत
वपि वाच्याने चेत्तत्र गंधत्वजात्यभ्युपगमे तत्रैव प्रत्यासत्त्यंगीकारे किमनेन कांछोद्भाहेण तथा च तत्र रूपाव्यंजकत्वे सुरभ्यादिगंधव्यंज
कत्वादिति सुरभ्यसुरभिभीकरणयोः पार्थिवत्वं प्रसाध्य पार्थिवेंद्रियग्राह्यत्वेनानुगतमनुविवोध्यात् तथा चानुगते रूपत्वे ज्ञाते रूपाव्यंजकत्वगर्भो रा
हेतुर्वोद्धव्यः तस्मिंश्च ज्ञाते गंधत्वधीस्तस्यां च सत्यामुक्तरूपत्वमतिरित्यन्योन्याश्रय इति संबंधे घ्राणादीनां नियमो नादरणीयः न च नीलसौरभा ८

क्रमेण १ वै १

[illegible]कात्वं गन्ध एव हेतुः कर्तव्यः तथा च तज्ज्ञानपर्यन्तापेक्षणात्। न चाति तद्व्यंजकत्वं न तद्व्यंजकतावच्छेदकाभावात् ग्राह्यत्वमन्यथा क्वचित्
नी[illegible]नये दिदृक्षुरह कार्येन्द्रादेव न व्यनत्ती निःशंकयाद दृष्टान्तादौ न तद्व्यंजकत्वस्यानवधारणात्। तथा च तद्व्यंजकत्वानापत्तेः तदव
च्छेदकाभावे गन्धे [illegible]माणे रूपत्वगन्धत्वादिधीरवश्यमनुसंधेया गन्धत्वादिगोचरधीजनकत्वस्य तद्व्यंजकतावच्छेदकत्वात् न हि तत्र पार्थिवेन्द्रि
यत्वादिना सौरभादिव्यंजकत्वमवच्छिद्यते। अननुगमात्। किंतु गन्धव्यंजकत्वं एवमन्तर्गतगन्धादिवृत्तौ तद्व्यंजकतावच्छेदकस्य प्रत्ययेन
दर्शनावगन्धे हेत्वर्थोऽयः। तज्ज्ञाने चोक्तरीत्या गन्धान्तर्गतधीरित्यन्योन्याश्रयसंभवेन दूषणालीनामनावश्यकमिति स्फुटं त्वं एवमित्यादि। तुष्यतु
दुर्जन इति न्यायेन नत्र तु नीलादिगन्धे एव हेतुस्तथापि नीलत्वजात्यन्तरोधादपि साक्षात्सहितिरित्याह नीलेति। चक्षुर्ग्राह्यत्वे चक्षुर्मात्रग्राह्यत्वं
अन्यथासिद्धिसंभवकाभावादिति। स्वमतेन समाधायोन्यमतेन समाधत्ते गोत्वेति नीलेति। इदं यद्यपि तारतमरूपनानागकारव्यक्तिवृत्ति
त्वापकृष्टैकनीलव्यक्तिस्वीकारेऽपि तारतम्यधीः संभवत्येव तथापि महानीलोऽल्पनील इत्येव तदा प्रत्ययः स्यात्। महागकारो अल्पगका
र इति चेत्। न तु नीलतर इत्यादि। प्रकृत्यर्थावच्छेदकजात्यवच्छिन्नावधिकोत्कर्षस्य तरप्रत्ययार्थत्वात्। अत एव न तत्र गतरत्वधीः। गत्व

प जात्यभावेन साक्षात्त्वाभावादिति विकारांतरेण तादृशत्वे विवक्षितं समानाधिकरण इति भावः । नहिति । नच तद्व्यत्यादिना रोपः अनारोपतयैवोपपत्तेः नच प्र
८२ त्यभिज्ञायामेव न्यायः स्फुटत्वात् नच तस्याः प्रमात्वे सैवोत्पादादिप्रत्ययबाधिका । एकप्रत्ययेनालीनत्वे अप्रत्ययस्योत्पत्त्यादिविषयभेदेनोन्नये
: प्रमात्वाभ्युपगमात् । तज्जातीयत्वेनैव तथा अपि [illegible] सायाः प्रमात्वे यथा भ्रमेदानगात् नैयायिकोत्पादादेरेव न विषयभेदकत्वं
तथा वक्ष्यते शब्दानित्यत्वे । एतावता इत्यापाततः परमार्थतस्तु तदेकत्वे समवायोत्पादादिना तद्व्यत्याद धीर्बोध्या । नच धर्मिग्राहकादेकतया सि
द्धस्य तस्य तद्भेदं प्रति संभवति समवायस्य समवायिकारणनाशात् । द्वितीयेपि गुणस्यापि समवायसंबंधेन समानाधिकरणविशेषिताभा
वात् । अन्यथा [illegible] संगतेन चापि संयोगस्याप्यसमवायस्तथा समानाधिकरणे समवेतत्वात् समवायस्येति बोध्यं । एवं [illegible]
[illegible] नित्यपि तुच्छत्वदर्शनमिति न्यायात् । वस्तुतो रूपत्वादिग्राहकतयैव साध्यत्वे । नचन
[illegible] साक्षात्त्वं [illegible] कृत्रिकतापत्तेः । नहि प्रत्यक्षनीलत्वं तत्रैवानुगमात् । नच [illegible] ८३
[illegible] पोऽत्यक्ष [illegible] । नच [illegible] लोकरूपानित्यत्वात् न चाश्रयविशेषा

त्वज्ञानात् । तदिन्द्रियकत्वप्रयोजकानां न तु तदिन्द्रियत्वमयमद्रष्टृत्वं [illegible] प्रत्यक्षे अनुगतत्वेन ज्ञानात् [illegible] इति रूपव्याप्तिभेदस्वीकारे सर्वोक्त
युक्त्या [illegible] भङ्गेन नास्तीति । प्रत्यासत्तीति । न चाप्रत्यासत्तित्वस्य कस्यापि [illegible] व्यापकतावच्छेदकाभावात् तदनुमानासंभवः । प्रत्यक्षजनकेन्द्रिय
निरूपितधर्मस्यैव प्रत्यासत्तित्वेन विवक्षितत्वात् । तावतैवाभिमतसिद्धेः । परामृष्टरूपगतजातेरिन्द्रिय[illegible]प्रतियोगिकत्वाभावात् । तत्प्रतियोगि
कधर्मीतरस्य प्रत्यक्षजनकत्वाभावात् । व्याप्तिश्च सामान्यतो मुखी प्रत्यक्षं तत्प्रत्यक्षजनकेन्द्रियप्रतियोगिकधर्मे वर्तते न वा [illegible] तथा
अन्यथा प्रत्यक्षजनकेत्यादिगर्भे साध्ये इन्द्रियान्योन्याभावेन सिद्धसाधनं शङ्क्य प्रत्यक्षजनकेत्यादि [illegible] साध्ये अप्रसिद्धिरिति [illegible]
तिसाध्ये । कर्मसंयोगावच्छिन्नेति । अवच्छेदक[illegible] विशेषणमिति भावः । ननु कर्मसंयोगादीति । अत एव कर्मसंयोगा[illegible]
त्वं कर्मसंयोगस्य विशेषणतायां बाधः उपलक्षणतायामतिप्रसंग इत्यपास्तं । कर्मसंयोगस्य समवायघटितत्वाभावेन तादृशविशेषणताघटकतयो
पलक्षणत्वात् । स्वरूपसंबन्धेन विशेषणत्वात्कपिसंयोगे बाधाभावादिति भावः । ननु सर्वत्र शङ्काधारता चेत्सर्वत्र सर्वज्ञातिप्रसंग इत्यत आह
एवं चेति । कर्मसंयोगेनेति । न च तस्याप्यव्याप्यवृत्तित्वात्तदवच्छेदकतारतम्योगः तत्रापि [illegible] इति भावः । समवायेनेति

प्र.प. ८४ स्वसमानाधिकरणात्यंताभावप्रतियोगित्वमव्याप्यवृत्तित्वं तच्चेदोन यथाऽसिद्धं समवाय[illegible]समवायवृत्तिसा[illegible]स्य च व्याप्यवृत्तित्वादित्यु
क्तपर्यवसितोर्थः। तद्धुयेन संबंधेन वृत्तित्वं तेन संबंधेनात्यंताभावप्रतियोगित्वं वाच्यं। अन्यथा व्याप्यवृत्तिमतः एवाव्याप्यवृत्तितापत्तेः।
तथा च विशेषणतया समवायो व्याप्यवृत्तिः समवायवृत्त्या समवायो अवृत्तिरेवेति न समवायेन न वा स्वरूपसंबंधेन तस्याव्याप्य[illegible]त्तित्वं। न
च समवायोपि व्याप्यास्ति न तदभावोपीति वाच्यं। [illegible]तः समवायावच्छिन्नप्रतियोगिकसमवायाभावेन स्वरूपसंबंधावच्छिन्नसमवायस्य समा
नाधिकरण्यस्याविरोधात्। अन्याभावप्रतियोगितावच्छेदकसंबंधेनैवोभयोरेकत्रविरोधात्। अत एवाकाशसंयोगे व्याप्ति अवृत्तेस्तस्य स
मवायावच्छिन्नाभावोपि अस्तीति यथा चैवं तदभावस्तथान्यत्र निवक्ष्यते। [illegible]दिति। शब्दसमवायो यो[illegible] विशेषणतया व्याप्यवृत्तिस्तदा सर्वं शब्द
समवायः सर्वकर्णसंयोगावच्छिन्न इत्यर्थः। [illegible]ति। वायोः रूपसमवायस्य स्वरूपाभाववत् शब्दसमवा[illegible] सत्त्वेपि यत्कर्णसंयोगावच्छेदेन श
ब्दाभाव[illegible] तत्र तत्र सत्त्वापि विषयाभावादेव न शब्दप्रत्यक्षं वायोः रूपप्रत्यक्षवत्। इयांस्तु विशेषः तत्र प्रतियोग्यभावयोर्वैयधिकरण्यं राम, ८४
अत्र तु विरुद्धावच्छेदकावच्छिन्नत्वं। न च कर्णसंयोगावच्छिन्नसमवा[illegible]स्य त्यादि[illegible] विशेषः। तत्रापि कर्णसंयोगावच्छिन्नस्य शब्द[illegible]स

मवाय इत्यर्थात्। तथाच समवायमात्रे प्रत्यासत्तिः। शब्दस्य कर्णसंयोगावच्छेदेनावच्छेदार्थोप्रत्यक्षत्वापत्तेः [illegible]दौ अत एव कर्णसंयोगेनेत्यादि
नासमवायत्वात् शब्दाधारतायामेव परिचायकतोक्ता। ननु समवाये कर्णसंयोगस्य परिचायकत्व उक्तं कर्णसंयोगस्य समवायावच्छेदकत्वसं
भवेपि तेन रूपेण प्रत्यासत्तितायां गौरवात्। किंतु समवायत्वेनैव। अतिप्रसंगस्य शब्दाभावादिवाभावादिति सर्वं सुस्थं। ननु समवायेन
शब्दोयमिह इति गृह्यमाणशब्दस्य यत्राधारता तदवच्छिन्नेन नः श्रोत्रेण तत्र वीणाद्यवच्छिन्नमपीति न कर्णावच्छिन्नमेवेत्यत आह। अर्थेति। नाव्यत्वा
दिति। इदमप्यापेक्षावक्तृतो व्यक्तिवाद्यन्त्यं न गौरवं किंत्ववच्छेदकस्य बहुघटितत्वं तच्च कर्णसंयोगावच्छिन्नत्वेनाग एव। तदप्रत्यक्षयाश
ब्ददेशत्वस्य लघुत्वादिति ध्येयं। एकदेशिसमाधानं दूषयति नन्विति। संनिकृष्टप्रवीणत्वात्। संनिधिरूपत्वात्। कर्णेति। न चोक्तलाघवं
शब्ददेशत्वेनापीन्द्रियत्वे कर्णावच्छिन्नस्यैव नष्टत्वात्। तस्यैव शब्ददेशत्वात्। एवं नावच्छेदकलाघवे व्यक्तिलाघवमप्यादरणीयं [illegible]
हलाघवादिति। यद्वा शब्ददेशतायामेव लाघवात्। अत एव तस्यैव शब्ददेशत्वं नान्यस्येत्यत्र हेतुं तत्र माह शब्देत्यादि समवायेन शब्दाश्र
देशब्दकरणस्यैव तत्समवायित्वसंत्यते हेतवो निर्वक्तुं नीतिस्मर्तव्यं। यद्वेति। अर्थन्तु विकल्पो न प्रकृतोपयुक्तः किंतु व्यवस्थि[illegible]। तथा

प्र·प ८५ संतानस्य सामायिकत्वे निमित्तस्य तत्कृत्यत्वे निमित्तभेदाभेदाभ्यां फलभेदाभेदयोः सर्वसंप्रतिपन्नो वायु[illegible]प्रागभावाभेदे वीचीतरंग
न्यायेन वायुप्रागभावभेदे च कदम्बगोलकन्यायः। एवं च दशदिशि द्वैतयोः वायवः प्रागभावावच्छिन्नाः [illegible] इति दशत्वे
एकत्वे वा न तस्य कथमपि नियमः किंतु संख्यानिमित्तसंख्यानुविधायिनीति तत्वं। अत्र च वायुभेदे वैजात्यं कुतो [illegible] नतु व्यक्तिभे
दः कारणतावच्छेदकभेदादेव कार्यभेदसंभवात्। अन्यथा [illegible] घटस्यापि भेदापातात्। वैजात्ये च तारमंदशब्द[illegible]नकवा
[illegible]दशदिक्कानां समावेशोनापि [illegible] दशदिक्त्वं [illegible] नतु तादृशवायुसर्वे एकजातीयः सर्वतोदिक्को वीचीतरंगवत्
[illegible] व्यक्ति[illegible] प्रागभावभेदे [illegible] नियमं वृथैव। ननु [illegible] स्वप्रागभावस्यावश्यकत्वादित्वसंगतं समं
[illegible] सर्व [illegible] न्यासविशेषात्। एवं रूपादिषु तथा कल्पनादित्यसंगतं न हि [illegible]
[illegible] सादौ प्रथमतः स्वप्रागभाव [illegible] तथा च पाकजरूपपरमेषु राम
[illegible] प्रागभावस्यान्यथा [illegible] प्रागभावस्य तथा [illegible] दित्वस्य रसादिरूपादिप्रागभावस्य व्यभिचारेण गंधप्रागभावम[illegible] ८५

हेतुत्वमूहादावश्यकमामाश्यइति। तुल्यत्वेपिपूर्वोविलक्षणत्वेपिसौरभनसौरभेऽसौरभनाशानंतरंसौरभंसौरभनाशानंतरंचासौर
भमित्यर्थः। नचतत्रएवंरूपनाशानंतरंरूपांतरमपिजातमेवेत्याह [illegible] वेति। श्यामानंतरंरक्तेत्यत्रपाकाद् [illegible] विद्यमानसजातीयमेवरू
पांतरमितिपाकेनदृष्टंइत्यग्निसंयोगस्याहआ [illegible] कारणं किंत्वन्यादृशेत्यर्थः। एवंसतिव्यभिचारादन्वयव्यभिचारादित्यर्थः। नहिसत्य
पिपाकेनष्टसजातीयंरूपंकदाप्युत्पन्नंदृष्टंतथाचतत्रगंधप्रागभावस्यापरनैरपेक्ष्येणकारणत्वकल्पनादावश्यकेनतेन [illegible] प्रागभा
वादीनामन्यथासिद्धत्वमित्यर्थः। ननुरूपादिस्थलेनवत्वप्रागभावोहेतुर्नैसर्वत्रयेनशब्दादि [illegible] स्थादिनिकाह। नन्वि [illegible] ति।
घटादिस्थलेज्ञानस्यपुनरजननात्कार्यमात्रंप्रतिस्वप्रागभावस्यकारणत्वकल्पनादित्यर्थः। एकेति। एकास्मगीरकामेवोत्पत्तिंजन
यतीत्यर्थः। सामग्रीति। नचाद्यसमयाभावादेवतत्संबंधरूपोत्पत्त्यभावः। तदन्तावस्थापि [illegible] तयाप्रागभावाहेतुत्वेहेतुत्वेनर
सत्वेतस्याव्याप्यत्वादितिभावः। यत्तुकारणाभावात्कार्याभावइत्यत्रकारण [illegible] नादिसंसर्गाभावोवाप्रागभावोवा। नचेहप्रागभाव
स्यप्रागभावोत्पत्तानावोवाकिंतुध्वंसइतिकथमित्यंहेतुताग्रहइति। नना [illegible] भावः। तथाचदृष्टसहितच

प्र॰प ८६

क्तानावच्छेदकतानागतावसमवहितदेशत्वं तज्ज्ञानावच्छेदकत्वोपिस्थूलनइति नोक्तं विदेतत् ॥ ॥ नन्विति ॥ शब्दरूपादेराश्रयसंबंधानावाचनतत्सा
क्षात्कारः प्रत्यासत्तिजन्य इत्यर्थः । यथाश्रुते सिद्धसिद्ध्यव्याघातादिति । विशेषणेति । संबंधविषयत्वे विद्धसाधनं प्रसिद्धोन्मत्तयोगिज्ञानसं
बंधविषयत्वस्य समूहालंबनवारणाय दंडपुरुषयोरेव विशेषण[illegible]विशेष्यत्वप्रतीतेर्नियमाप्रसर्वसंमतत्वाद तत्त्वं विशेषणवि
शेष्येति । न च प्रतियोगित्वादेरनय निरूप्यत्वं विशेषणे प्रतियोगित्वस्य विशेष्ये चानुयोगित्वस्य नानात्वं [illegible]गादेरन्यनिरूप्यत्वमिति न
वः । प्रत्यक्षएवोपोद्बलकं तत्कमाह नलीति । समवायिनाविति । नीलोघट इत्यादिप्रतीतौ तथाकारानुभवादित्यर्थः । एवमग्रेपि । स्वा
तंत्र्येण नाह शाब्दनवीनोनय संमतौ येन तौ प्रणालीक्रियेतामिति भावः । स्वरूपेणेति । स्वरूपेण वैशिष्ट्यविषयता न विशेषणत्वेन न वावि
शेष्यत्वेनेत्य[illegible]जिमतं तन्नु न संनवत्येव अन्यथैव ज्ञानेन विषयीकरणादिति स्वाभिसंधिना स्वरूपेणेत्यस्मदादेः प्रत्यक्षेन रूपेण
